श्रीनारायणपण्डिताचार्य विरचितः

सुमध्वविजयः

अणुमध्वविजयं, फलमालिकां च

The Sumadhva Vijaya

of Nārāyaṇa Paṇḍita

With Foreword and Concordance

ISBN 0-9703421-3-6

http://www.dvaita.org

kernel version 1.00, October 29, MM

© 2000, Shrisha Rao

This edition, along with all its prefatory material and indices, is copyrighted under Title XVII, United States Code, and similar laws in other countries. Permission is hereby given to make single copies for individual, non-profit uses in “private study, scholarship, and research” as allowed under the law, provided that such reproduction be done of this entire publication, especially including this notice. All other uses, as well as storage or archival of this material in any publicly accessible medium, are expressly forbidden unless prior written consent is obtained.

Table of Contents

Foreword	i
Contributors	vii
प्रथमः सर्गः	१
द्वितीयः सर्गः	७
तृतीयः सर्गः	१५
चतुर्थः सर्गः	२०
पञ्चमः सर्गः	२५
षष्ठः सर्गः	३०
सप्तमः सर्गः	३६
अष्टमः सर्गः	४२
नवमः सर्गः	४७
दशमः सर्गः	५२
एकादशः सर्गः	५८
द्वादशः सर्गः	६६
त्रयोदशः सर्गः	७२
चतुर्दशः सर्गः	७९

पञ्चदशः सर्गः ८७

षोडशः सर्गः ९९

अणुमध्वविजयः १०८

सुमध्वविजयप्रमेयफलमालिका ११४

श्लोकार्धानुक्रमणिका ११७

Foreword

The Sumadhvavijaya is a biographical account of Ācārya Madhva composed by Śrī Nārāyaṇa Panditācārya, the son of Śrī Trivikrama Panditācārya, who was a contemporary of Acharya Madhva. The generally accepted dates for Madhva are 1238-1317 CE, while those for Nārāyaṇa Panditācārya are 1295-1370 CE. It is very likely that the young Nārāyaṇa was associated with many of the events covered in detailed descriptions of Ācārya Madhva's life — especially those which occur in *sarga*-s twelve through sixteen of the Sumadhvavijaya. This is evident from the wealth of detail and close observation that one notices here, in contrast to the earlier sections where the descriptions are very brief or accompanied by only poetic embellishments. There is no doubt that the entire family — the father Trivikrama, Śankara the brother of Trivikrama, and Nārāyaṇa the son, were tremendously impressed by the personality of Ācārya Madhva, whose beauty, physique, personality, strength, endurance, pleasant and attractive manners, erudition, and all round scholarship, etc., find repeated mention in the compositions of all these authors. Nārāyaṇa Panditācārya has used nearly a thousand synonyms in describing Madhva in the Sumadhvavijaya, essentially referring to his vast knowledge and great intellect. Thus, there is no doubt that the Sumadhvavijaya is a first-person account of the life of Ācārya Madhva as seen at close quarters, by a gifted author, at least in the latter portions of the text, while the earlier portions are based on authentic hearsay from his immediate disciples.

Writing the biography of Ācārya Madhva, he of the multifaceted and divine personality, would have been a difficult assignment for anyone. The requirements of presenting the extraordinary life in its different aspects — the precocious child born to pious parents after a long wait and ardent prayers to Lord Ananteśvara; his early renunciation of the world, confronting the-then powerful Advaita head-on without any compromises; the series of miraculous doings indicating his divinity; his detailed and authentic knowledge about the ancient scriptures like the Vedas, Upaniṣads and Itihāsa — would not be easy. It certainly would need a fine balance between factual presentation coupled with admiration for the glorious personality, a clear summary of esoteric and protracted discussions with opponents, and a portrait of the subject's personal traits, where the full and marvelous personality is delineated in a word picture. It is not for nothing that it is believed that Madhva is present himself in the form of Sumadhvavijaya and no one, even the other great personages of the order ever tried to write another similar work. The composition has secured great respect and acceptance

comparable to the original compositions of Madhva himself from all succeeding savants of Tattvavāda.

It is worth noting the explanation given by Nārāyaṇa Paṇḍitāchārya himself about the manner of his writing the composition. In the Bhāvaprakāshikā, an auto-commentary on the Sumadhvavijaya, he says:

> "Whatever has been stated here has been mostly narrated to me by more than one source: 'I have seen so with my own eyes,' thus has been said in most cases. Whenever there was a difference between the accounts given by two sources, I have accepted the one which was stronger (more reliable). I have neither said things here just for poetic embellishment, nor to praise the Guru, nor to show my own scholarship. Therefore, readers ought not to doubt the authenticity of my account here."

It is clear from this that Nārāyaṇa Paṇḍitāchārya composed the account after he had carefully analysed the data available. The organization of the text also indicates this — the first nine *sarga*-s carry accounts which are not very detailed in nature, with circumstantial details generally not available. For instance, we notice that the installation of Lord Kṛṣṇa in Udupi, a major action of Madhva, has been described in only four *śloka*-s. It would appear that the events described in these chapters had happened long before the Sumadhvavijaya was composed. In particular, the poet starts his account of this momentous event from a description of the immersion of the icon of Lord Kṛṣṇa in the Madhvasarovara for washing, and provides no hint about how it was obtained. (There are many stories attributable to great saints subsequently, describing the circumstances of the finding.) All the events right up to Madhva's two visits to Badarikāśrama apparently had taken place long before and could be known only from anecdotes narrated by his disciples. The tenth *sarga* seems to be a summary of some then-prevalent compositions describing the earlier incidents associated with Madhva's visits to the northern part of the country. The eleventh *sarga* is an exposition[1] in highly poetic language of the philosophical position of the Tattvavāda concept of *mokṣa*. The *sarga*-s twelve, et seq. clearly show details of names, places (mostly in Kerala and South Canara), and sequences of events which became known to the author by direct experience or by listening to first-hand accounts. The detailed description of Madhva's daily routine given in the

[1] Ascribed to Śeṣa based on an incident of a bright light being seen in the moon-less sky when Madhva was giving a discourse, as explained in the Bhāvaprakāśika.

thirteenth *sarga* appears to be an eyewitness account. The final *sarga* is clearly one where the poet has considerable detailed information. Incidents described here include: bathing in the sea (described in fourteen *śloka*-s); defeating the Gaṇḍavāṭa brothers; going around the Kaṇṭheśwara temple on the shoulders of a young boy; defeating Pūrvavaṭa, Shivāgni etc.; renovating the Pārantī temple; getting the pond in Yerki Maṭha filled by rain; composing the Kṛṣṇāmṛta Mahārṇava and the Karma Nirṇaya in Vaidyanātheśwara and Ujire, etc. Only the incidents of Madhva's establishing the validity of the Vedas on the banks of the Gomatī river (possibly the one near Dwārakā) and of his lifting and carrying the huge boulder near Kalasa seem to be distant to the poet, and may have been included here rather than in the tenth *sarga*, where a number of such wondrous incidents have been described, for convenience.

The poet, while discussing the basis of his accounts of the superhuman actions of Ācārya Madhva, says thus in the Bhāvaprakāśikā:

> "Of these (miracles) seen by humans, some were forgotten by the action of *deva māyā*, and even of those which were not forgotten, we did not come to know all of them. Even out of what we heard, we have not described some as they are to be treated as divine secrets."

Therefore, the poet urges that his work be considered a historiography rather than a hagiography regardless of the miracles described in it, and indeed, his sincerity and skill are clearly discernible in his careful approach to the subject and mastery of presentation.

There is authentic evidence available today about many events described in the Sumadhvavijaya, of which we just mention the following:

1. The huge stone boulder (6.1 meters $\times$ 3.6 meters $\times$ 10.98 meters) carried by Ācārya Madhva near Kalasa is still there with an inscription on it. This evidence has also appeared in a Gazetteer of the erstwhile princely state of Mysore dated 1901 CE. The incident is narrated in the 16th *sarga* — shlokas 7-9.

2. The names Nadillaya (Madhyageha Bhaṭṭa), Pāje (Pājaka Kṣetra), Kunjaru (Vimāna Giri), etc., exist even today. Similarly, names such as Gaṇḍavāṭa, Pūrvavāṭa, etc., still continue to be used in the area.

Even so, we should add that the historical accuracy of some accounts like that of Ācārya Madhva meeting the Muslim king, his meeting Īśwara Deva, etc., need authentic verification, though nothing is presently known that contradicts them clearly. The actual period of

Madhva itself had been under considerable doubt, till it was revealed that the Śrīkūrmam inscriptions clearly indicate that Madhva's dates are 1238-1317 CE. It has been opined that "Īśwara Deva" was Mahādeva, a Yādava king who ruled Devagiri from 1260-1271 CE, while the Muslim king was Jalaluddin Khilji of Delhi (1290-1296 CE). It appears unlikely that Madhva's northern trip, apparently distant in time to Nārāyaṇa Paṇḍita, was so late in his life; Balban in Agra is dated 1249-1266 CE and seems to fit in better.

It is also argued that the identities of Vidyāśaṇkara, Padmatīrtha, etc., who feature in the Sumadhvavijaya as prominent scholars of Advaita who lost to Madhva, are not clear as pertaining to the heads of Advaita Maṭhas in that period. (The records of the Advaitic Maṭha-s and lineages are not clear until after the time of Madhva.) But people remember winners and not losers! It is also highly unlikely that the traditional Maṭha *guru parampara*-s, which extol their past ascetics, would highlight defeats and ignominy of some of them. An example is the famous debate between Vidyāraṇya and Akṣobhya Tīrtha (adjudicated by Vedānta Deśika), where the latter won, but which would not be acknowledged by neutral scholarship, but for the inscriptional evidence and the records available in the neutral ground of Viśiṣṭādvaita tradition.

There are some other aspects of the Sumadhvavijaya which deserve special mention in this introduction.

As Mm. Dr. B.N.K. Sharma says (private communication), "[Madhva's] biography, unlike others of its kind pertaining to Śaṇkara and others, has a perfect historical perspective and never indulges in anachronisms and episodes of a compromising nature to the subject." We get, according to Dr. Sharma (ibid.), a "pen-picture of Madhva saying that he had all the *mahāpuruṣalakṣaṇa*-s. Madhva was a great sportsman, and also a good wrestler, mountaineer, etc." The early incidents of digesting horsegram as a baby still on mother's milk, eating thousands of plantains and drinking pots of milk as a young lad, and eating all the food offered by several hosts in Badarinath — as well as keeping a complete fast with total silence for 48 days in that extremely cold and difficult place before going to meet Śrī Veda Vyāsa — all portray Madhva as one who was not an ordinary person dependent on food. Similarly, Madhva is said to have shown that God is present everywhere, even as a toddler of two years, by his actions in visiting the temples. The attachment of his parents to the beautiful child, and their sorrow when he renounced the world at the young age of eight years, are poignant, but Madhva maintains his dignity and conviction without hurting them.

The descriptive verses on Madhva are lyrical and heartwarming. The great love of the poet for his subject shines through brilliantly in these. One gets a narrative of the great Guru that is profound yet simple and accessible to all, and which shows him to be all-knowing and kind hearted to devotees, loyal to his childhood friends; with enormous powers, but choosing to take all his disciples and his own nominal Guru along with him like an ordinary human being. Madhva, according to his biographer, was one who always acted as he preached.

The lyrical descriptions of Madhva meeting Veda Vyāsa and Nārāyaṇa which have come from the imagination of the poet appear as if Madhva himself wrote them — such is the linguistic skill, fervor and intensity of devotion displayed. The ability of the poet to use the maximum flexibility of the Sanskrit language in conveying, in an appropriate manner, two or three meanings with each set of words, while preserving the musical rhythm of the lines, is amazing. The use of *upamā* and other embellishments as powerful media for emphasizing the essential aspects is resorted to freely, and in some cases the poet touches a chord in our hearts, such as when he talks of Hanuman devoutly using both hands to carry flowers for worshipping his beloved Rāma, while he carried the Gandhamādana mountain with just one!

There is a tradition in Sanskrit that a *mahākāvya* should have certain features like a hero who is exemplary, descriptions of towns, ocean, mountains, sunrise/moonrise, marriage, travel, war, etc. The *sarga*-s should not be too long or too short, and at the end of each, the subject matter of the next must be indicated. The Sumadhvavijaya is seen to contain almost all the main requirements of a *mahākāvya*.

It is also seen that in the case of many other personalities like Śaṇkara, etc., there is more than one chronicle written long after the person's demise. These thus give cause for genuine doubts about authenticity, and rely for the most part on traditional stories preserved by word of mouth. There are also conflicts between the accounts. The Sumadhvavijaya does not suffer from any of these shortcomings, also because of its unique status. Thanks to the commentary written by the author himself, the details are made clear and unambiguous. The method adopted by the author in presenting his material is unexceptionable and shows great mastery. There is a case for further study in fixing many historical elements mentioned here, but the honesty and integrity of the author shines through the composition like a beacon guiding us in the right direction.

I am very happy that the Dvaita Home Page is publishing electronically this great text for the benefit of all admirers of Ācārya Madhva. They already have to their credit the successful publications of the Mahābhārata Tātparya Nirṇaya and the Īśāvāsya Upaniṣad which have been widely welcomed. The late revered Śrī 1008 Vidyāmānya Tīrtha Swāmījī, of the Palimāru/Bhaṇḍārakeri Maṭha-s has already communicated his blessings for this great endeavour for the publication of all the Mādhva *sarvamūla* and such compositions on the Net. I would like to add my own best wishes to them for all success in this and in future efforts.

D. Prahladacharya
Vice Chancellor
Rāṣṭrīya Saṃskṛta Vidyāpīṭha, Tirupati

October 26, 2000
Dīpāvaḷī

Contributors

The first fourteen *sarga*-s of the text were coded by Raghavendra Rachuri. The last two were added by Krishna Kadiri. Meera Tadipatri and Anand Ravipati read proofs, and the former also coded the Aṇu-Madhva-Vijaya and the Phala-Mālikā. Proofing was also done in parts by Keshava Tadipatri and Shrisha Rao. The *ślokārdhānukramaṇikā* (verse concordance) was generated by Anand Ravipati using a computer program.

The latest version of this material is always available on the web at `http://www.dvaita.net`, and the persons who maintain it may be reached by electronic mail at `dvaita@dvaita.org` as well.

॥ श्रीः ॥

सुमध्वविजयः

प्रथमः सर्गः

कान्ताय कल्याणगुणैकधाम्ने नवद्युनाथप्रतिमप्रभाय ।
नारायणायाखिलकारणाय श्रीप्राणनाथाय नमस्करोमि ॥ १.१॥

अनाकुलं गोकुलमुल्ललास यत्पालितं नित्यमनाविलात्म ।
तस्मै नमो नीरदनीलभासे कृष्णाय कृष्णारमणप्रियाय ॥ १.२॥

अपि त्रिलोक्या बहिरुल्लसन्ती तमोहरन्ती मुहुरान्तरं च ।
दिश्याद्दृशं नो विशदां जयन्ती मध्वस्य कीर्तिर्दिननाथदीप्तिम् ॥ १.३॥

तमोनुदाऽऽनन्दमवाप लोकस्तत्त्वप्रदीपाकृतिगोगणेन ।
यदास्यशीतांशुभुवा गुरूंस्तांस्त्रिविक्रमार्यान् प्रणमामि वर्यान् ॥ १.४॥

मुकुन्दभक्तयै गुरुभक्तिजायै सतां प्रसत्त्यै च निरन्तरायै ।
गरीयसीं विश्वगुरोर्विशुद्धां वक्ष्यामि वायोरवतारलीलाम् ॥ १.५॥

तां मन्त्रवर्णैरनुवर्णनीयां शर्वेन्द्रपूर्वैरपि वक्तुकामे ।
सङ्क्षिप्तवाक्ये मयि मन्दबुद्धौ सन्तो गुणाढ्याः करुणां क्रियासुः ॥ १.६॥

उच्चावचा येन समस्तचेष्टाः किं तत्र चित्रं चरितं निवेद्यम् ।
किन्तूत्तमश्लोकशिखामणीनां मनोविशुद्ध्यै चरितानुवादः ॥ १.७॥

मालाकृतस्तच्चरिताख्यरत्नैरसूक्ष्मदृष्टेः सकुतूहलस्य[1] ।
पूर्वापरीकारमथापरं वा क्षाम्यन्तु मे हन्त मुहुर्महान्तः ॥ १.८॥

श्रीवल्लभाज्ञां ससुरेन्द्रयाञ्चां सम्भाव्य सम्भाव्यतमां त्रिलोक्याम् ।
प्राणेश्वरः प्राणिगणप्रणेता गुरुः सतां केसरिणो गृहेऽभूत् ॥ १.९॥

ये ये गुणा नाम जगत् प्रसिद्धा यं तेषु तेषु स्म निदर्शयन्ति ।
साक्षान्महाभागवतप्रबर्हं श्रीमन्तमेनं हनुमन्तमाहुः ॥ १.१०॥

कर्माणि कुर्वन् परमाद्भुतानि सभासु दैवीषु सभाजितानि ।
सुग्रीवमित्रं स जगत् पवित्रं रमापतिं रामतनुं ददर्श ॥ १.११॥

पादारविन्दप्रणतो हरीन्द्रस्तदा महाभक्तिभराभिनुन्नः ।
अग्राहि पद्मोदरसुन्दराभ्यां दोर्भ्यां पुराणेन स पूरुषेण ॥ १.१२॥

अदार्यसालावलिदारणेन व्यापादितेन्द्रप्रभवेन तेन ।
प्राद्योतनिप्रीतिकृता निकामं मधुद्विषा सन्दिदिशे स वीरः ॥ १.१३॥

कर्णान्तमानीय गुणग्रहीत्रा रामेण मुक्तो रण कोविदेन ।
स्फुरन्नसौ वैरिभयङ्करोऽभूत्सत्पक्षपाती प्रदरो यथाऽग्र्यः ॥ १.१४॥

गोभिः समानन्दितरूपसीतः स्ववह्निनिर्दग्धपलाशिराशिः ।
अहो हनूमन्नववारिदोऽसौ तीर्णाम्बुधिर्विष्णुपदे ननाम ॥ १.१५॥

अपक्षपाती पुरुषस्त्रिलोक्यामभोगभोक्ता पतगाधिराजम् ।
विश्वम्भरं बिभ्रदसौ जिगाय त्वरापराक्रान्तिषु चित्रमेतत् ॥ १.१६॥

निबद्ध्य सेतुं रघुवंशकेतु भ्रूभङ्गसम्भ्रान्तपयोधिमध्ये ।
मुष्टिप्रहारं दशकाय सीता सन्तर्जनाग्र्योत्तरमेषकोऽदात् ॥ १.१७॥

जाज्वल्यमानोज्ज्वलराघवाग्नौ चक्रे स सुग्रीवसुयायजूके ।
आध्वर्यवं युद्धमखे प्रतिप्रस्थात्रा सुमित्रातनयेन साकम् ॥ १.१८॥

रामार्चने यो नयतः प्रसूनं द्वाभ्यां कराभ्यामभवत्प्रयत्नः ।
एकेन दोष्णा नयतो गिरीन्द्रं सञ्जीवनाद्याश्रयमस्य नाभूत् ॥ १.१९॥

---

[1] सुकुतूहलस्य

स दारितारिं परमं पुमांसं समन्वयासीन्नरदेवपुत्र्या ।
वह्निप्रवेशाधिगतात्मशुद्ध्या विराजितं काञ्चनमालयेव ॥ १.२०॥

श्यामं स्मितास्यं पृथुदीर्घहस्तं सरोजनेत्रं गजराजयात्रम् ।
वपुर्जगन्मङ्गळमेष दृग्भ्यां चिरादयोध्याधिपतेः सिषेवे ॥ १.२१॥

राज्याभिषेकेऽवसितेऽत्र सीता प्रेष्ठाय नस्तां भजतां दिशेति ।
रामस्य वाण्या मणिमञ्जुमालाव्याजेन दीर्घां करुणां बबन्ध ॥ १.२२॥

हृदोरुसौहार्दभृताऽधिमौलिन्यस्तेन हस्तेन दयार्द्रदृष्ट्या ।
सेवाप्रसन्नोऽमृतकल्पवाचा दिदेश देवः सहभोगमस्मै ॥ १.२३॥

प्रेष्ठो न रामस्य बभूव तस्मान् न रामराज्येऽसुलभं च किञ्चित् ।
तत्पादसेवारतिरेष नैच्छत् तथापि भोगान्ननु सा विरक्तिः ॥ १.२४॥

नमो नमो नाथ नमो नमस्ते नमो नमो राम नमो नमस्ते ।
पुनःपुनस्ते चरणारविन्दं नमामि नाथेति नमन् स रेमे ॥ १.२५॥

किं वर्णयामः परमं प्रसादं सीतापतेस्तत्र हरिप्रबर्हे ।
मुञ्चन्महीं नित्यनिषेवणार्थं स्वात्मानमेवैष ददौ यदस्मै ॥ १.२६॥

स्वानन्दहेतौ भजतां जनानां मग्नः सदा रामकथासुधायाम् ।
असाविदानीं च निषेवमाणो रामं पतिं किम्पुरुषे किलास्ते ॥ १.२७॥

तस्यैव वायोरवतारमेनं सन्तो द्वितीयं प्रवदन्ति भीमम् ।
स्पृष्टयैव यं प्रीतिमताऽनिलेन नरेन्द्रकान्ता सुषुवेऽत्र कुन्ती ॥ १.२८॥

इन्द्रायुधं हीन्द्रकराभिनुन्नं चिच्छेद पक्षान् क्षितिधारिणां प्राक् ।
बिभेद भूभृद्वपुरङ्गसङ्गाच्चित्रं स पन्नो जननीकराग्रात् ॥ १.२९॥

पुरे कुमारनलसान्विहारान् निरीक्ष्य सर्वानपि मन्दलीलः ।
कैशोरलीलां हतसिंहसङ्घां वने प्रवृत्तां स्मरति स्म सूत्कः ॥ १.३०॥

भुक्तं च जीर्णं परिपन्थिदत्तं विषं विषण्णो विषभृद्गणोऽतः ।
प्रमाणकोटेः स हि हेलयाऽगान्नेदं जगज्जीवनदेऽत्र चित्रम् ॥ १.३१॥

दग्ध्वा पुरं योगबलात् स निर्यन्धर्मानिव स्वान् सहजान् दधानः ।

अदारिभावेन जगत् सुपूज्यो योगीव नारायणमाससाद ॥ १.३२॥

समर्प्य कृत्यानि कृती कृतानि व्यासाय भूम्ने सुकृतानि तावत् ।
करिष्यमाणानि च तस्य पूजां सङ्कल्पयामास स शुद्धबुद्धिः ॥ १.३३॥

विष्णोः पदश्रिद्वकसंनिरासी क्षिप्तान्यपक्षिप्रकरः सुपक्षः ।
ससोदरोऽथादित राजहंसः स राजहंसीमिव राजकन्याम् ॥ १.३४॥

इन्दीवरश्रीजयसुन्दराभं स्मेराननेन्दुं दयितं मुकुन्दम् ।
स्वमातुलेयं कमलायताक्षं समभ्यनन्दत्सुचिराय भीमः ॥ १.३५॥

महागदं चण्डरणं पृथिव्यां बार्हद्रथं मङ्क्षु निरस्य वीरः ।
राजानमत्युज्ज्वलराजसूयं चकार गोविन्दसुरेन्द्रजाभ्याम् ॥ १.३६॥

दुःशासनेनाकुलितान् प्रियायाः सूक्ष्मानरालानसितांश्च केशान् ।
जिघांसया वैरिजनस्य तीक्ष्णः स कृष्णसर्पानिव सञ्चिकाय ॥ १.३७॥

जाज्वल्यमानस्य वने वनेऽलं दिधक्षतः पार्थिवसार्थमुग्रम् ।
सत्त्वानि पुंसां भयदानि नाशं वृकोदराग्नेर्गुरुतेजसाऽऽपुः ॥ १.३८॥

भोगाधिकाभोगवतोऽरुणाक्षानितस्ततः सञ्चलतो धरेन्द्रे ।
बहून्द्विजिह्वान् मणिमत्पुरोगान् असौ कटून् क्रोधवशान् जघान ॥ १.३९॥

अथैष वेषान्तरभस्मलीनः क्रमेण वायुप्रभवः सुतेजाः ।
रुद्धाखिलाशं मुखरं प्रचण्डं भस्मीचकाराखिलकीचकौघम् ॥ १.४०॥

स कृष्णवर्त्मा विजयेन युक्तो मुहुर्महाहेतिधरोऽप्रधृष्यः ।
भीष्मद्विजाद्यैरतिभीषणाभं विपक्षकक्षं क्षपयन् विरेजे ॥ १.४१॥

तरस्विनः प्रोच्चलितानधीरान् निर्दग्धपक्षाननितीक्ष्णकोपान् ।
स धार्तराष्ट्रान् बहुहेतिलीलो विनाश्य विश्वान् परया श्रियाऽभात् ॥ १.४२॥

कृष्णाङ्घ्रिपङ्केरुहभृङ्गराजः कृष्णामुखाम्भोरुहहंसराजः ।
प्रजासरोजावलिरश्मिराजः ससोदरोऽराजत वीरराजः ॥ १.४३॥

पौत्रे पवित्राह्वयजामिपौत्रे धरां निधायासुरधीषु तापम् ।
कीर्तिं त्रिलोक्यां हृदये मुकुन्दं भेजे पदं स्वं सहजैः स भीमः ॥ १.४४॥

विष्णोः पदान्तं भजताऽनिलेन घोरप्रघातैरिति नाशितास्ते ।
रसोज्झिताश्चञ्चलवृत्तयोऽलं शोभां न भेजुः सुरवैरिमेघाः ॥ १.४५ ॥

एतत् प्रतीपं किल कर्तुकामा नष्टौजसः सङ्कटमेवमाप्य ।
मुकुन्दवैगुण्यकथां स्वयोग्यां काले कलावाकलयन्त तेऽलम् ॥ १.४६ ॥

यो भूरिवैरो मणिमान् मृतः प्राग् वाग्मी बुभूषुः परितोषितेशः ।
स सङ्कराख्योऽङ्घ्रितलेषु जज्ञे स्पृधाऽपरेऽप्यासुरिहासुरेन्द्राः ॥ १.४७ ॥

सान्नाय्यमव्यक्तहृदाखुभुग्वा श्वा वा पुरोडाशमसारकामः ।
मणिस्रजं वा स्रवगोऽव्यवस्थो जग्राह वेदादिकमेष पापः ॥ १.४८ ॥

जनो नमेन्नापरथेति मत्त्वा शठश्चतुर्थाश्रममेष भेजे ।
पद्माकरं वा कलुषं चिकीर्षुः सुदुर्दमो दुष्टगजो विशुद्धम् ॥ १.४९ ॥

अवैदिकं माध्यमिकं निरस्तं निरीक्ष्य तत्पक्षसुपक्षपाती ।
तमेव पक्षं प्रतिपादुकोऽसौ न्यरूरुपन् मार्गमिहानुरूपम् ॥ १.५० ॥

असत्पदेऽसन्सदसद्विविक्तं मायाख्यया संवृतिमभ्यधत्त ।
ब्रह्माप्यखण्डं बत शून्यसिद्ध्यै प्रच्छन्नबौद्धोऽयमतः प्रसिद्धः ॥ १.५१ ॥

यद् ब्रह्मसूत्रोत्करभास्करं च प्रकाशयन्तं सकलं स्वगोभिः ।
अचूचुरद् वेदसमूहवाहं ततो महातस्करमेनमाहुः ॥ १.५२ ॥

स्वसूत्रजातस्य विरुद्धभाषी तद्भाष्यकारोऽहमिति ब्रुवन् यः ।
तं तत्क्षणाद्यो न दिधक्षति स्म स व्यासरूपो भगवान् क्षमाब्धिः ॥ १.५३ ॥

निगमसन्मणिदीपगणोऽभवत् तदुरुवाग्गणपङ्कनिगूढभाः ।
अविदुषामिति सङ्करताकरः स किल सङ्कर इत्यभिशुश्रुवे ॥ १.५४ ॥

विश्वं मिथ्या विभुरगुणवान् आत्मनां नास्ति भेदो ।
दैत्या इत्थं व्यदधत गिरां दिक्षु भूयः प्रसिद्धिम् ।
आनन्दाद्यैर्गुरुगुणगणैः पूरितो वासुदेवो ।
मन्दं मन्दं मनसि च सतां हन्त नूनं तिरोऽभूत् ॥ १.५५ ॥

इति श्रीमत्कविकुलतिलक त्रिविक्रमपण्डिताचार्यसुत

नारायणपण्डिताचार्यविरचिते श्रीमत्सुमध्वविजये

महाकाव्ये आनन्दाङ्के प्रथमः सर्गः

द्वितीयः सर्गः

विज्ञानभानुमति कालबलेन लीने
दुर्भाष्यसन्तमससन्ततितो जनेऽन्धे ।
मार्गात् सतां स्खलति खिन्नहृदो मुकुन्दं
देवाश्चतुर्मुखमुखाः शरणं प्रजग्मुः ॥ २.१॥

नाथः कलौ त्रियुगहूतिरनुद्बुभूषुः
ब्रह्माणमप्यनवतारमनादिदिक्षुः ।
सर्वज्ञमन्यमनवेक्ष्य सकार्यवीर्यं
स्मेराननो भुवन जीवनमाबभाषे ॥ २.२॥

वेदान्तमार्गपरिमार्गणदीनदूना
दैवीः प्रजा विशरणाः करुणापदं नः ।
आनन्दयेः सुमुख भूषितभूमिभागो
रूपान्तरेण मम सद्गुणनिर्णयेन ॥ २.३॥

आदेशमौलिमणिमुज्ज्वलवर्णमेनं
बद्धाञ्जलिर्मरुदनर्घमधत्तमूर्ध्वा ।
हारावलीमिव हृदा विबुधेन्द्रयाञ्चां
बिभ्रन्निजाननुजिघृक्षुरवातितीर्षत् ॥ २.४॥

कालः स एव समवर्तत नाम यावत्
चिन्ताकुलं विविधसाधुकुलं बभूव ।
वेदान्तसन्ततकृतान्तरसं न विद्मः
श्रेयो लभेमहि कथं नु वयं बतेति ॥ २.५॥

तत्प्रीतये रजतपीठपुराधिवासी
देवो विवेश पुरुषं शुभसूचनाय ।
प्राप्ते महाय महिताय महाजनौघे
कोलाहलेन सुकुतूहलिनि प्रवृत्ते ॥ २.६॥

आविष्टवानकुशलं पुरुषं प्रकृत्या
प्रत्याययन्निजजनान्नितरामनृत्यत् ।

उत्तुङ्गकेतुशिखरे स कृताङ्गहारो
रङ्गान्तरे नट इवाखिलविस्मयात्मा ॥ २.७॥

आभाष्य सोऽत्र जनतां शपथानुविद्धं
उच्चैरिदं वचनमुद्धृतदोर्बभाषे ।
उत्पत्स्यते जगति विश्वजनीनवृत्तिः
विश्वज्ञ एव भगवानचिरादिहेति ॥ २.८॥

सद्द्वीपवारिनिधिसप्तकभूतधात्र्या
मध्येऽपि कर्मभुवि भारतनामखण्डे ।
काले कलौ सुविमलान्वयलब्धजन्मा
सन्मध्यगेहकुलमौलिमणिर्द्विजोऽभूत् ॥ २.९॥

वेदाद्रिसद्रजतपीठपुरेश्वराभ्यां
ग्रामो विभूषिततरः शिवरूप्यनामा ।
हेमाद्रिराजविभुराजदिलावृताभ-
स्तस्याभवद् गुरुगुणः खलु मूलभूमिः ॥ २.१०॥

रामाधिवेशितहरिस्वसृमौलिमाला-
राजद्विमानगिरिशोभितमध्युवास ।
क्षेत्रं स पाजकपदं त्रिकुलैककेतुः
कं यद्दधाति सततं खलु विश्वपाजात् ॥ २.११॥

अर्थं कमप्यनवमं पुरुषार्थहेतुं
पुंसां प्रदातुमुचितामुचितस्वरूपाम् ।
कन्यां सुवर्णलसितामिव वेदविद्यां
जग्राह विप्रवृषभप्रतिपादितां सः ॥ २.१२॥

रेमेऽच्छयोपनिषदेव महाविवेको
भक्त्यैव शुद्धकरणः परमश्रिताऽलम् ।
मिथ्याभिमानरहितः परयेव मुक्त्या
स्वानन्दसन्ततिकृता स तया द्विजेन्द्रः ॥ २.१३॥

तस्य प्रभोश्चरणयोः कुलदेवताया
भक्तिं बबन्ध निजधर्मरतः स धीरः ।
विज्ञातभारतपुराणमहारहस्यं
यं भट्ट इत्यभिवदन्ति जना विनीतम् ॥ २.१४॥

गोविन्दसुन्दरकथासुधया स नॄणां
आनन्दयन्न किल केवलमिन्द्रियाणि ।
किन्तु प्रभो रजतपीठपुरे पदाब्जं
श्रीवल्लभस्य भजतामपि दैवतानाम् ॥ २.१५ ॥

इत्थं हरेर्गुणकथासुधया सुतृप्तो
नैर्गुण्यवादिषु जनेष्वपि साग्रहेषु ।
तत्त्वे स कालचलधीरतिसंशयालुः
धीमान् धिया श्रवणशोधितया प्रदध्यौ ॥ २.१६ ॥

त्राता य एव नरकात्स हि पुत्रनामा
मुख्यावनं न सुलभं पुरुषादपूर्णात् ।
तस्मात्समस्तविदपत्यमवद्यहीनं
विद्याकराकृति लभेमहि कैरुपायैः ॥ २.१७ ॥

पूर्वेऽपि कर्दमपराशरपाण्डुमुख्या
यत्सेवया गुणगणाढ्यमपत्यमापुः ।
तं पूर्णसद्गुणतनुं करुणामृताब्धिं
नारायणं कुलपतिं शरणं व्रजेम ॥ २.१८ ॥

इत्थं विचिन्त्य स विचिन्त्यमनन्यबन्धुः
प्रेष्ठप्रदं रजतपीठपुराधिवासम् ।
भक्त्या भवाब्धिभयभङ्गदया शुभात्मा
भेजे भुजङ्गशयनं द्विषडब्दकालम् ॥ २.१९ ॥

पत्न्या समं भगवतः स भजन् पदाब्जं
भोगान् लघूनपि पुनर्लघयाञ्चकार ।
दान्तं स्वयं च हृदयं दमयाञ्चकार
स्वच्छं च देहमधिकं विमलीचकार ॥ २.२० ॥

तीव्रैः पयोव्रतमुखैर्विविधैर्व्रताग्र्यै-
र्जायापती गुणगणार्णवपुत्रकामौ ।
सम्पूर्णपूरुषमतोषयतां नितान्तं
देवेरितावित्र पुराऽदितिकश्यपौ तौ ॥ २.२१ ॥

नाथस्य भूरिकरुणासुधयाऽभिषिक्तौ

श्रीश्रीधरप्रततिसारशरीरयष्टी ।
भूरिव्रतप्रभवदिव्यसुकान्तिमन्तौ
तौ देहशुद्धिमतिमात्रमथालभेताम् ॥ २.२२॥

कान्तादृतौ समुचितेऽथ बभार गर्भं
सा भूसुरेन्द्रदुहिता जगतां सुखाय ।
अच्छाम्बरेव रजनी परिपूरिताशा
भाविन्यपास्ततमसं विधुमाद्यपक्षात् ॥ २.२३॥

तं पूर्वपक्षसितबिम्बमिव प्रवृद्धं
यावद् द्विजेन्द्रवनिता सुषुवेऽत्र तावत् ।
अंशेन वायुरवतीर्य स रूप्यपीठे
विष्णुं प्रणम्य भवनं प्रययौ तदीयम् ॥ २.२४॥

सम्पूर्णलक्षणचणं नवराजमान-
द्वारान्तरं परमसुन्दरमन्दिरं तत् ।
राजेव सत्पुरवरं भुवनाधिराजो
निष्कासयन् परमसौ भगवान्विवेश ॥ २.२५॥

सन्तुष्यतां सकलसन्निकरैरसङ्गिः
खिद्येत वायुरयमाविरभूत् पृथिव्याम् ।
आख्यन्निवीव सुरदुन्दुभिमन्द्रनादः
प्राश्रावि कौतुकवशैरिह मानवैश्च ॥ २.२६॥

नाथं निषेव्य भवनानतिदूरमाप्तः
प्राज्ञो महप्रकृतदुन्दुभिनादपूर्वात् ।
पुत्रोऽवश्रवणतो महदाप्य सौख्यं
ज्ञानं परोक्षपदमप्यमतेष्टहेतुम् ॥ २.२७॥

आविश्य वेश्म निजनन्दनमिन्दुवक्त्रं
भूयोऽभिनन्द्य स मुकुन्ददयां प्रवन्द्य ।
जातस्य तस्य गुणजातवहस्य जात
कर्मादिकर्मनिवहं विदधे सुकर्मा ॥ २.२८॥

ज्ञानार्थमेव यदभूदसुदेव एष
यद्वासुदेव पदभक्तिरतः सदाऽसौ ।
तद्वासुदेवपदमन्ववदन् सुरेन्द्रा-

स्तातेन यन्निगदितं सुतनामकर्त्रा ॥ २.२९॥

पातुं पयांसि शिशवे किल गोप्रदोऽस्मै
पूर्वालयः स्वसुतसूनुतया प्रजातः ।
निर्वाणहेतुमलभीष्ट परात्मविद्यां
दानं ध्रुवं फलति पात्रगुणानुकूल्यात् ॥ २.३०॥

अत्रस्तमेव सततं परिफुल्लचक्षुः
कान्त्या विडम्बितनवेन्दु जगत्यनर्घ्यम् ।
तत्पुत्ररत्नमुपगृह्य कदाचिदाप्तः
स्वस्वामिने बुध उपायनमार्पयत्सः ॥ २.३१॥

नत्वा हरिं रजतपीठपुराधिवासं
बालस्य सम्पदमनापदमर्थयित्वा ।
साकं सुतेन परिवारजनान्वितोऽसौ
प्रायान्निशीथसमये निजमेव धाम ॥ २.३२॥

दोषेयुषां सममनेन वनेऽतिभीमे
तत्क्रीडितग्रह इहैकतमं तुतोद ।
उद्वान्तरक्तमवलोक्य तमभ्यधायि
केनाप्यहो न शिशुतुत् कथमेष इत्थम् ॥ २.३३॥

आविश्य पूरुषमुवाच महाग्रहोऽसौ
अस्मद्विहारसमयोपगतान् समस्तान् ।
यच्छक्तिगुप्तिरहितानलमस्मि हन्तुं
लोकेश्वरः स बत बालतमः किलेति ॥ २.३४॥

स्तन्येन बालमनुतोष्य मुहुः स्वधाम्नो
माता कदाचन ययौ विरहासहाऽपि ।
विश्वस्य विश्वपरिपालकपालनाय
कन्यां निजामनुगुणां किल भीरुरेषा ॥ २.३५॥

सा बालकं प्ररुदितं परिसान्त्वयन्ती
मुग्धाक्षरेण वचसाऽनुनिनाय मुग्धा ।
मा तात तात सुमुखेति पुनः प्ररोदी-
र्माता तनोति रुचितं त्वरितं तवेति ॥ २.३६॥

रोदे क्रियासमभिहारत एव वृत्ते
पोतस्य मातरि चिरादपि नागतायाम् ।
जग्राह बालमथ चैक्षत मातृमार्गं
साऽपि क्रियासमभिहारत एव बाला ॥ २.३७॥

कर्तव्यमौढ्यमभिपद्य निरूप्य सा तं
प्राभोजयत् खलु कुलित्थकुलं प्रपङ्कम् ।
शीतं पयोऽपि सततं परिपाययन्ती
यस्योष्णरोगमतिवेलमशङ्कताम्बा ॥ २.३८॥

नूनं पिपासुरतिरोदिति हन्त बालो
धिङ् मां दयाविरहितां परकृत्यसक्ताम् ।
इत्याकुला गृहमुपेत्य तदा प्रसन्नं
पूर्णोदरं सुतमवैक्षत विप्रपत्नी ॥ २.३९॥

पृष्ट्वाऽवगम्य सकलं च ततः प्रवृत्तं
यूनां च दुःसहमिदं शिशुनोपभुक्तम् ।
इत्थं विचिन्त्य तनयां बहु भर्त्सयन्त्या
भीतं तयाऽनु कुपितं मनसाऽनुतप्तम् ॥ २.४०॥

आरोग्यशालिनि तदाऽपि पुरेव पुत्रे
विस्मेरतामुपजगाम जनन्यमुष्य ।
यस्य त्रिलोकजननी जननी विषेऽपि
पीते न विस्मयमवाप समस्तशक्तेः ॥ २.४१॥

स्तन्यं मुहुः किल ददौ जननी गृहीत्वा
क्षेमाय तं किल दधज्जनको जजाप ।
अन्यो जनोऽपि किल लालयति स्म किन्तु
सर्वोऽपि तन्मुखसुहासरसायनोत्कः ॥ २.४२॥

देवादिसङ्घिरनुपालितयाऽदरेण
देव्यात्मनेव विलसत्पदया नितान्तम् ।
अव्यक्तया प्रथमतो वदनेऽस्य वाण्या
शालीनयेव भुवनार्चितया विजह्रे ॥ २.४३॥

प्राग्रिङ्खणं स्वयमथ स्थिथिमेष चक्रे
पश्चाद्गतिं परिचयेन किल क्रमेण ।

विश्वस्य चेष्टितमहो यदनुग्रहेण
सर्वं तदस्य पवनस्य विडम्बनं हि ॥ २.४४॥

पुच्छान्तमच्छमवलम्ब्य कदाचिदेष
प्रातर्व्रजाद्व्रजत एव निजर्षभस्य ।
प्रायात् प्रियस्य सहसा स्वजनैरदृष्टो
ननावनेषु चरतश्चरतस्तृणानि ॥ २.४५॥

उत्तुङ्गशृङ्गलसितस्य महिष्ठमूर्तेः
पादावृतावनितलस्य सुरन्ध्रकस्य ।
आश्रित्य तस्य शुशुभेऽवयवैकदेशं
बालो दिवाकर इवोदयपर्वतस्य ॥ २.४६॥

लीलां करोति नु गृहान्तरगो नु बालः
कूपान्तरे नु पतितः प्रकृतिस्वतन्त्रः ।
इत्थं विचिन्त्य स मुहुः स्वजनो विमृग्य
हन्तानवेक्ष्य तनयं हृदि तापमाप ॥ २.४७॥

बालस्य बालपरिलम्बनगोचरं त-
द्वश्वस्यतापिवचनं वनगोचरोक्तम् ।
यत् सायमैक्षत जनः शिशुमाव्रजन्तं
एकाब्दकं वृषभबालकृतावलम्बम् ॥ २.४८॥

चिन्तामणीन्द्रमिव चिन्तिततदं दरिद्रो
विज्ञानमार्गमिव विष्णुपरं मुमुक्षुः ।
नष्टं च नन्दनमिति स्वजनोऽस्य लब्ध्वा
नाथस्य तस्य तमनुग्रहमेव मेने ॥ २.४९॥

लीलावसानसमये सहसा कदाचिद्
आर्योऽमुनाऽभ्यवहृतिं प्रति चोद्यमानः ।
रोद्धैष नोऽस्ति धनिको वृषविक्रयीति
प्रोवाच नन्दनमुखेन्दुमवेक्ष्य मन्दम् ॥ २.५०॥

लीलाकरेण स करेण सुकोमलेन
बीजान्तराणि किल कानिचिदाशु तस्मै ।
स्मित्वाऽर्भकोऽभिमतनिष्कपदे यदाऽदा-
दादत्त तानि धनिको बहुमानपूर्वम् ॥ २.५१॥

लब्धं सुतादिति वदन् द्विजपुङ्गवेन
कालान्तरे निजधने प्रतिदित्सितेऽपि ।
साक्षादमानवनवाकृतितः स लेभे
बीजच्छलेन पुरुषार्थमहो विशिष्टम् ॥ २.५२॥

वासुदेवमिह वासुदेवतासत्कलामभिननन्द तं जनः ।
वासुदेवमिति वासुदेवसन्नामकं विविधलीलमर्भकम् ॥ २.५३॥

इति विहरति मह्यां विष्णुदासेऽपि गूढे
समजनि सुजनानां चित्तमानन्दपूर्णम् ।
उदयति घनमालालीनभानौ च भानौ
ननु जननयनाब्जैर्लभ्यतेऽलं विकासः ॥ २.५४॥

इति श्रीमत्कविकुलतिलक त्रिविक्रमपण्डिताचार्यसुत

नारायणपण्डिताचार्यविरचिते श्रीमत्सुमध्वविजये

महाकाव्ये आनन्दाङ्के द्वितीयः सर्गः

तृतीयः सर्गः

अथ कदाचन सुन्दरनन्दनस्मितमुखेन्दुदृशां दयितौ नृणाम् ।
महमितो निजबन्धुमुदे मुदा प्रययतुः स्वजनैः सह दम्पती ॥ ३.१॥

स्वजनतापगमागमसङ्गमप्रतिसभाजितपूर्वकसम्भ्रमे ।
अविदुषी जननीति स बालकः शरणतो रणतो निरगान्नृभिः ॥ ३.२॥

क्व नु यियाससि तात न साम्प्रतं स्वजनसन्त्यजनं तव साम्प्रतम् ।
इति विभुः पथिकैरुदितो व्रजन् स्मितमनाकुलमुत्तरमातनोत् ॥ ३.३॥

त्वरितमेत्य स काननदेवतासदनमत्र ननाम रमापतिम् ।
अपि ततः प्रगतो लघुनारिकेल्युपपदान्तरसद्मगतं च तम् ॥ ३.४॥

नलिननाभनिभालनसन्मदागमविकस्वरभास्वरलोचनः ।
जनमनोनयनाम्बुजभास्करो रजतपीठपुरं प्रययावसौ ॥ ३.५॥

सुहयमेधगणातिशयालवो हरिनमस्कृतयः सुकृता इमाः ।
इति सुरैरपि भूसुरमण्डलैः समनमत् स सविस्मयमीक्षितः ॥ ३.६॥

न हि हरिं सततं न नमत्यसौ न च न पश्यति नापि न वन्दते ।
अपि तथेति विधाय विशेषतः स ननु साधुजनान् समशिक्षयत् ॥ ३.७॥

अनवलोक्य सुतं सुतवत्सलो मृगयति स्म महीसुरपुङ्गवः ।
मुहुरपृच्छदमुष्य गतिं नरान् पथि पथि प्रगतोऽनुपदं द्रुतम् ॥ ३.८॥

जनसदागतिसूचितवर्त्मना प्रतिपदं व्रजता परया तृषा ।
द्विजमहामधुपेन मनोहरं स्मितमलाभि सुताननवारिजम् ॥ ३.९॥

विरहदूनतयोद्गमनोन्मुखं न्यरुणदश्रु पुरा स ययोर्दृशोः ।
अथ तयोः प्रमदोत्थितमप्यदः प्रतिनिरुध्य गिरं गुरुरब्रवीत् ॥ ३.१०॥

अयि सुतेदमुदाहर तत्त्वतो ननु समागतवानसि साम्प्रतम् ।
स्वजनतारहितस्य तु कोऽत्र ते सहचरोऽर्भक दीर्घतमे पथि ॥ ३.११॥

जनकवाचमिमामवधारयन् कलमुदाहरदम्बुरुहेक्षणः ।
स्वपदमाव्रजतो व्रजतोऽप्यतो ननु सखा मम काननगो विभुः ॥ ३.१२॥

तदितरायतनात्तु यदागमं कृतनतिः खलु तत्र हरिः सखा ।
अहमिहापि महेन्द्रदिगालयं प्रणतवानुत यावदधीश्वरम् ॥ ३.१३॥

अपि ततोऽहमुपेत्य सहामुना भगवतेऽत्र सते प्रणतिं व्यधाम् ।
इति निगद्य विभाति शिशुः स्म विस्मितसभाजनचीर्णसभाजनः ॥ ३.१४॥

विरहितस्वजनं चरणप्रियं विविधभूतभयङ्करवर्त्मनि ।
अयि कृपालय पालय बालकं लघुशुभस्य ममेत्यनमद् द्विजः ॥ ३.१५॥

तमुपगृह्य सुतं सुतपोनिधिर्गृहमसौ गृहिणीसहितो ययौ ।
उदयतीति हि बालदिवाकरे स्मितमभूत् सुजनाननवारिजम् ॥ ३.१६॥

वरविमानगिरावपि चण्डिका शिशुमहो जननी तमलालयत् ।
अपरथा परितुष्टमनाः कथं चिरमिहैष वसेद्विसहायकः ॥ ३.१७॥

सकलशब्दमयी च सरस्वती सततमानमति स्वयमेव यम् ।
द्विजवरोऽथ कदाचन मातृकाः किल सुतं परिचाययति स्म तम् ॥ ३.१८॥

लिपिकुलं ननु तात गते दिने लिखितमेव पुनर्लिखितं कुतः ।
इति निजप्रतिभागुणभावितं हरिपदस्य वचस्तमनन्दयत् ॥ ३.१९॥

शिशुरसौ प्रतिभाम्बुधिरित्यलं जनमनोवचनग्रहपीडना ।
न भवतादिति तं विजनस्थले स्वतनयं समशिक्षयदेषकः ॥ ३.२०॥

महवता स्वजनेन समीरितस्वजननीसहितेन कदाचन ।
रुचिरवाचनयाऽर्चितवाक्श्रिया प्रति यये प्रभुणा घृतवत्यपि ॥ ३.२१॥

परिषदा नितरां परिवारितः शिवपदः किल धौतपटोज्ज्वः ।
इह कथां कथयन् ददृशे ततः पृथुधिया पृथुकाकृतिनाऽमुना ॥ ३.२२॥

इदमुवाच विचारविचक्षणः शुचिवचः शनकैः स जनान्तरे ।
अपरथा कथितं कथक त्वया ननु मतात् महतामिति सस्मितम् ॥ ३.२३॥

अगणयन्न शिवं जनता तदा सवचने वसुदेवसुताह्वये ।
मुखरमिच्छति को मृगधूर्तकं प्रकृतहुङ्कृतसिंहशिशौ सति ॥ ३.२४ ॥

अथ कथां[2] कथयेति तदा जने गदितवत्युचितार्थमुदाहरत् ।
स समलात्यत विस्मयिभिर्नरैरपि सुरैर्विजयाङ्कुरपूजकैः ॥ ३.२५ ॥

स जननीसहितो जनकं गृहे प्रगतवांस्तमुदन्तमवेदयत् ।
निगद तात शिवः कथकः स किं वितथगीरथवाऽहमितीरयन् ॥ ३.२६ ॥

ननु सुतावितथं कथितं त्वयेत्यमुमुदीर्य सविस्मयमस्मरत् ।
प्रकृतितः कृतिता खलु मे शिशोर्मदधिनाथदयोदयजेत्यसौ ॥ ३.२७ ॥

कथयतां प्रथमे कथयत्यलं स्वजनके जनसङ्घवृते कथाम् ।
सकललोकमनोनयनोत्सवश्चतुरधीः स कदाचिदवाचयत् ॥ ३.२८ ॥

विविधशाखिपदार्थनिवेदने लिकुचनाम्नि तदाऽनुदितार्थके ।
किमिति तात तदर्थमवर्णयन् कथयसीति शनैरयमब्रवीत् ॥ ३.२९ ॥

अवदतीति पितर्यपि चोदिते प्रतिबुभुत्सुषु तत्र जनेष्वपि ॥
अयमुदीर्य तदर्थमवाप्तवान् परिषदो ह्यसमानसुमाननाम् ॥ ३.३० ॥

बहुविधैश्चरितैरिति चारुभिः सकललोककुतूहलकारिणम् ।
द्विजवरेण वयस्युचिते स्थितं तमुपनेतुमनेन दधे मनः ॥ ३.३१ ॥

समुचितग्रहयोगगुणान्वितं समवधार्य मुहूर्तमदूषणम् ।
प्रणयबन्धुरबान्धववानसौ द्विजकुलाकुलमुत्सवमातनोत् ॥ ३.३२ ॥

विविधवेदतया विजिहीर्षवो वदनरङ्गपदेऽस्य चिराय याः ।
सुरवरप्रमदा अपि सप्रिया अभिननन्दुरहो वियतो महम् ॥ ३.३३ ॥

विहितसाधनसाधितसत्क्रियोज्ज्वलनमुज्ज्वलधीर्ज्वलयन्नयम् ।
उपनिनाय सुतं समलङ्कृतं कुशलिनं कुशलीकृतशीर्षकम् ॥ ३.३४ ॥

परिचराग्निगुरू चरितव्रतः सुचरणः पठ साधु सदागमान् ।
इति गुरोस्त्रिजगद्गुरुशिक्षणे स्फुटमहासि सुरैः कृतसाक्षिभिः ॥ ३.३५ ॥

---

[2] कथं

जितकुमारगुणं सुकुमारकं निजकुमारमवेक्ष्य निरन्तरम् ।
समुचिताचरणे चतुरं स्वतः क्षितिसुरो मुदमायत शिक्षयन् ॥ ३.३६॥

स पटखण्डमकिञ्चनवत् क्वचित् स्वविभवानुचितं चरणादिकम् ।
भुवनभर्तुरहो स्वनिगूहनं सुरसभासु कुतूहलमातनोत् ॥ ३.३७॥

अविरलैर्गरलोष्मभिराकुलीकृतसमस्तजनो विचचार यः ।
क्वचिदमुं निजघांसुरशान्तिमानुपससर्प स सर्पमयोऽसुरः ॥ ३.३८॥

त्वरितमुद्यतविस्तृतमस्तकः प्रतिददंश यदैनमविक्षतम् ।
प्रभुपदारुणचारुतराङ्गुलीविहृतिपिष्टतनुः प्रतताम सः ॥ ३.३९॥

गरुडतुण्डमिव प्रतिपन्नवान् द्विजकुमारपदं स ममार च ।
समुचितं चरितं महतामिदं सुमनसो मनसेष्टमपूजयन् ॥ ३.४०॥

गिरिशगुर्वमरेन्द्रमुखैश्च यच्चरणरेणुरधारि सुराधिपैः ।
क्षितिसुराङ्ग्र्यभिवन्दनपूर्वकं स विदधेऽध्ययनं छलमानुषः ॥ ३.४१॥

करतले खलु कन्दुकवत् सदा सकलया कलया सह विद्यया ।
अरिधरेण समं स्फुरितं गुरोर्मनसि तस्य विडम्बयतो जनान् ॥ ३.४२॥

अनधिकैरधिकैश्च वयस्यथो बहुभिरध्ययनोपरमान्तरे ।
अनिकटे वटुभिः पटुभिर्गुरोः स विजहार सुखी सखिभिः समम् ॥ ३.४३॥

पदमुदीर्य जवेन यियासितं द्रुतसखेष्वभवत् स पुरःसरः ।
अयमयत्नतयेति न विस्मयो ननु मनोजवजित् पवनो ह्यसौ ॥ ३.४४॥

श्रवनतेजसि हन्त न केवलं विजितवान् स तदा सकलान् जनान् ।
प्रभुनिदेशकरो हनुमत्तनौ ननु जिगाय स वालिसुतादिकान् ॥ ३.४५॥

जलविहारपराजयिभिः स्पृधा सखिभिरीरितवारिपरिश्रितम् ।
वदनमाकुललोचनमादधे स्मितममुष्य हि कञ्चन विभ्रमम् ॥ ३.४६॥

स शनकैर्बलिनो युगपद्गतान् प्रविहृतेषु सखीन् निरपातयत् ।
अशनकैर्युगपत् प्रकृताहवान् सहसितो द्विजसूनुरयत्नवान् ॥ ३.४७॥

ग्रहणनिग्रहणे ग्रहणे दृढे गुरुभरोद्धरणादिविधौ पटौ ।

इह विभावुपचारधिया नृणामृतमयं ननु भीम इतीरितम् ॥ ३.४८॥

विहरतीति पठत्यपि न स्फुटं स्वगृहगामिनि चाद्भुतमायति ।
परितुतोष न तत्र जगद्गुरौ स किल पूगवनान्वयजो द्विजः ॥ ३.४९॥

अथ कदाचन सोऽध्ययनान्तरे तमवदत् कुपितोऽन्यमनस्विनम् ।
पठसि नो शठ ते सखिभिः समं किमिति नित्यमुदासितधीरिति ॥ ३.५०॥

गुणनिका चरणादिकगोचरा न मम हृद्दयितेत्युदितेऽमुना ।
वद विशारदवाद यथेप्सितं त्वमुपरीत्यवदद्धरणीसुरः ॥ ३.५१॥

सकललक्षणशिक्षणमूलभूः श्रुतिसमाननं स्खलनोज्झितम् ।
न खलु केवलमस्य गुरोर्व्यधात् सुमनसामपि तत्र कुतूहलम् ॥ ३.५२॥

प्रियवयस्यशिरोगुरुवेदनामशमयत् सहजामपि दुःसहाम् ।
स विपिने विजने मुखवायुना श्रवणगोचरितेन कदाचन ॥ ३.५३॥

अधिगतोपनिषच्च सकृच्छ्रुता प्रकटभागवतीति न विस्मयः ।
अधिगता ननु जात्वपि नैं श्रुताः प्रतिभया श्रुतयः शतशोऽमुना ॥ ३.५४॥

साक्षादथोपनिषदो विभुरैत्तरेय्याः
पाठच्छलेन विजनेऽर्थरसान् ब्रुवाणः ।
अध्यापकाय विततार विमोक्षबीजं
गोविन्दभक्तिमुचितां गुरुदक्षिणां सः ॥ ३.५५॥

अयि स्वामिन् दुष्टान् दमय दमय व्यक्तमचिरात्
गुणान् गूढान् विष्णोः कथय कथय स्वान् प्रमदयन् ।
तदाऽनन्दं तन्वन्निति सुमनसां सोऽनुसरता
मनुज्ञामादत्त त्रिभुवनगुरुर्ब्राह्मणगुरोः ॥ ३.५६॥

इति श्रीमत्कविकुलतिलक त्रिविक्रमपण्डिताचार्यसुत

नारायणपण्डिताचार्यविरचिते श्रीमत्सुमध्वविजये

महाकाव्ये आनन्दाङ्के तृतीयः सर्गः

चतुर्थः सर्गः

अथैष सल्लोकदयासुधार्द्रया सदागमस्तेन निरासकामया ।
रमावरावासभुवा विशारदो विशालयाऽचिन्तयदात्मनो धिया ॥ ४.१॥

अनन्यसङ्गाद् गुणसङ्गिता हरेर्जनस्य मानं तु विशिष्टचेष्टितम् ।
असङ्गमस्मात् प्रकटीकरोम्यहं निजं भजन् पारमहंस्यमाश्रमम् ॥ ४.२॥

मम प्रभोर्नापरथा हि शोभते द्विषत्सु विष्णुं यददण्डधारणम् ।
हरिस्वसा नन्वचिरादसङ्गिदे भवेदतो नास्मि च दण्डधारकः ॥ ४.३॥

विचिन्तयन्नित्थमनन्तचिन्तकः समस्तसन्यासनिबद्धनिश्चयः ।
असावनुज्ञार्थमथानमद्धरिं समस्तसंव्यापिनमात्मदायगम् ॥ ४.४॥

निजे जने किं नमसीति पृच्छति ब्रुवन् स्ववस्तुप्रणतिं व्यधामिति ।
गुरोः किलान्वेषणवान् जगद्गुरुस्तदा जगामाखिललोकशिक्षकः ॥ ४.५॥

यतिर्यतात्मा भुवि कश्चनाभवद्विभूषणो भूरिविरक्तिभूषणः ।
न नाममात्राच्छुचिमर्थतोऽपि यं जनोऽच्युतप्रेक्षमुदाहरत् स्फुटम् ॥ ४.६॥

पुरैष कृष्णाकरसिद्धशुद्धिमद्धरान्नभुक्तया किल पाण्डवालये ।
विशोधितात्मा मधुकृत्प्रवृत्तिमांश्चचार कांश्चित् परिवत्सरान् मुदा ॥ ४.७॥

अभूत्कुशास्त्राभ्यसनं न पातकं क्रमागताद्विप्रतिसारतो यतेः ।
यथा कुशस्त्राध्यसनं मुरद्विषः पदाम्बुजे व्याधवरस्य गर्हितम् ॥ ४.८॥

विनीतमाम्नायशिरोविशारदं सदैव तत्त्वं प्रबुभुत्सुमादरात् ।
गुरुर्विदित्वोपगतां निजां मृतिं कदाचिदूचे तमुपद्धरे गिरम् ॥ ४.९॥

अहं स्वयं ब्रह्म न किञ्चिदस्ति मत्परं विजृम्भेत यदा स्फुटं चितिः ।
इतीह मायासमयोपपादितं निरन्वयं सुव्रत मा स्म विश्वसीः ॥ ४.१०॥

यदेतदात्मैक्यमुपास्तिचोदितं न मे गुरोरप्यपरोक्षतां गतम् ।
पुरातनानामपि सौम्य कुत्रचित् ततो मुकुन्दं भज संविदे मुदा ॥ ४.११॥

इतीदमादिश्य वचो वचस्विनि स्वके गुरौ लोकमथान्यमीयुषि ।
असेवतालोच्य मुहुर्गुरोर्गिरं स रूप्यपीठालयमिन्दिरावरम् ॥ ४.१२॥

सुभक्तिना तेन स भक्तवत्सलो निषेवितस्तत्र परं बुभुत्सुना ।
भविष्यतः शिष्यवराद्धि विद्धि मामिति प्रविष्टः पुरुषं तमभ्यधात् ॥ ४.१३॥

प्रतीक्षमाणं तमनुग्रहं मुदा निषेवमाणं पुनरम्बुजेक्षणम् ।
सतां गुरुः कारणमानुषाकृतिर्यतिं प्रशान्तं तमुपाससाद सः ॥ ४.१४॥

सुतं यतीन्द्रानुचरं विरागिणं निशम्य संन्यासनिबद्धमानसम् ।
सुवत्सलौ रूप्यतलालयस्थितं वियोगतान्तौ पितरौ समीयतुः ॥ ४.१५॥

वराश्रमस्ते जरतोरनाथयोर्न जीवतोः स्यादयि नन्दनावयोः ।
सयाचनं वाक्यमुदीर्य ताविदं परीत्य पुत्राय नतिं वितेनतुः ॥ ४.१६॥

नतिर्न शुश्रूषुजनाय शस्यते नतं भवङ्ग्यां स्फुटमत्र साम्प्रतम् ।
अहो विधात्रा स्वयमेव दापिता तदभ्यनुज्ञेति जगाद स प्रभुः ॥ ४.१७॥

अनुत्तरज्ञः स तमर्थयन् पुनः यतीन्द्रमानम्य गतः प्रियायुतः ।
गृहे वसन् कल्पसमान् क्षणान्नयन् सुताननेन्दोरनिशं ततोऽस्मरत् ॥ ४.१८॥

स चिन्तयन् पुत्रमनोरथं शुचा पुनश्च तीर्त्वोपगतो महानदीम् ।
व्रतीश्वरानुव्रतमात्मनन्दनं तमैक्षत ग्रामवरे मठान्तरे ॥ ४.१९॥

सञ्जातकोपाकुलितो धरासुरो महात्मनां लङ्घनभीरुरप्यलम् ।
सुतस्य कौपीनधृतौ हि साहसप्रतिश्रवो मे दृढ इत्यभाषत ॥ ४.२०॥

क्षणेन कौपीनधरो निजं पटं विदार्य हे तात कुरुष्व साहसम् ।
इतीममुक्त्वा विभुरब्रवीत् पुनः शुभान्तरायं न भवांश्चरेदिति ॥ ४.२१॥

न पुत्र पित्रोरवनं विना शुभं वदन्ति सन्तो ननु तौ सुतौ मृतौ ।
निवर्तमाने न हि पालकोऽस्ति नौ त्वयीति वक्तारममुं सुतोऽब्रवीत् ॥ ४.२२॥

यदा विरक्तः पुरुषः प्रजायते तदैव सन्यासविधिः श्रुतौ श्रुतः ।
न सङ्गहीनोऽपि परिव्रजामि वामहं तु शुश्रूषुमकल्पयन्निति ॥ ४.२३॥

बहुश्रुतत्वाद्यदि तत्सहे बलान्न सा सवित्री विरहं सहेत ते ।

इति द्विजेनाभिहितेऽनमत् स तं भवाननुज्ञां प्रददात्विति ब्रुवन् ॥ ४.२४॥

विचिन्त्य विद्वान् स निरुत्तरीकृतस्तथाऽस्तु माताऽनुवदेद्यदीति तम् ।
उदीर्य कृच्छ्रादुपगम्य मन्दिरं प्रियासकाशे तमुदन्तमब्रवीत् ॥ ४.२५॥

निशाचरारेरिव लक्ष्मणः पुरा वृकोदरस्येव सुरेन्द्रनन्दनः ।
गदोऽथ शौरेरिव कर्मकृत् प्रियः सुभक्तिमान् विश्वविदोऽनुजोऽभवत् ॥ ४.२६॥

कदाचिदाप्यालयबुद्धिरालयं निवेदयन् पालकमेनमेतयोः ।
दृढस्वसंन्यासनिषेधनिश्चयां धवानुमत्येदमुवाच मातरम् ॥ ४.२७॥

वराश्रमाप्तिं मम संवदस्व मां कदाचिदप्यम्ब यदीच्छसीक्षितुम् ।
यदन्यथा देशमिमं परित्यजन् न जातु दृष्टेर्विषयो भवामि वः ॥ ४.२८॥

इति ब्रुवाणे तनये कदाचिदप्यदर्शनं तस्य मृतेर्निदर्शनम् ।
विचिन्त्य पर्याकुलिता चिकीर्षितं सुतस्य कृच्छ्रान्न्यरुणन्न सा शुभा ॥ ४.२९॥

अथोपगम्यैष गुरुं जगद्गुरुः प्रसाद्य तं देववरप्रसादितः ।
सदा समस्ताश्रमभाक् सुरेश्वरो विशेषतः खल्वभजद्वराश्रमम् ॥ ४.३०॥

क्रियाकलापं सकलं स कालविद्विधानमार्गेण विधाय केवलम् ।
सदा प्रसन्नस्य हरेः प्रसत्तये मुहुः समस्तन्यसनं समभ्यधात् ॥ ४.३१॥

अनन्तमात्रान्तमुदाहरन्ति यं त्रिमात्रपूर्वं प्रणवोच्चयं बुधाः ।
तदाऽभवद्भाविचतुर्मुखाकृतिर्जपाधिकारी यतिरस्य सूचितः ॥ ४.३२॥

गुणानुरूपोन्नतिपूर्णबोध इत्यमुष्य नाम द्विजवृन्दवन्दितः ।
उदाहरद् भूरियशा हि केवलं न मन्त्रवर्णः स च मन्त्रवर्णकः ॥ ४.३३॥

निरङ्गरागं मुखरागवर्जितं विभूषणं विष्टपभूषणायितम् ।
अमुं धृताषाढमवेक्ष्य मेनिरे स्वभावशोभाऽनुपमेति जन्तवः ॥ ४.३४॥

भुजङ्गभूतेशविहङ्गपादिकैः प्रवन्दितः सावसरप्रतीक्षणैः ।
ननाम सोऽयं गुरुपूर्वकान् यतीनहो महीयो महतां विडम्बनम् ॥ ४.३५॥

वराश्रमाचारविशेषशिक्षणं विधित्सुरस्याचरितं निशामयन् ।
विशेषशिक्षां स्वयमाप्य धीरधीः यतीश्वरो विस्मयमायतान्तरम् ॥ ४.३६॥

स रौप्यपीठालयवासिने यदा ननाम नाथाय महामतिर्मुदा ।
तदाऽमुनाऽग्राहि नरप्रवेशिना भुजे भुजेनाशु भुजङ्गशायिना ॥ ४.३७॥

चिरात् सुतत्त्वं प्रबुभुत्सुना त्वया निषेवणं मे यदकारि तत्फलम् ।
अमुं ददामीत्यभिधाय सोऽमुना तदा प्रणीय प्रददेऽच्युतात्मने ॥ ४.३८॥

अनुग्रहं तं प्रतिगृह्य सादरं मुदाऽऽत्मनाऽऽप्तां कृतकृत्यतां स्मरन् ।
अभूदसङ्गोऽपि स तत्सुसङ्गवानसङ्गभूषा ननु साधुसङ्गिता ॥ ४.३९॥

यियासति स्वस्तटिनीं मुहुर्मुहुर्नमत्यनुज्ञार्थिनि भूरिचेतसि ।
तमस्मरत् स्वामिनमेव दूनधीर्गुरुर्भविष्यद्विरहाग्निशङ्कया ॥ ४.४०॥

इतस्तृतीये दिवसे द्युनिम्नगा त्वदर्थमास्माकतटाकमाव्रजेत् ।
अतो न याया इति तं तदाऽवदत् प्रविश्य कञ्चित् करुणाकरो हरिः ॥ ४.४१॥

तदाज्ञयोपागतजाह्नवीजले जनोऽत्र सस्नौ सह पूर्णबुद्धिना ।
ततः परं द्वादशवत्सरान्तरे सदाऽऽव्रजेत् सा तदनुग्रहाङ्किनी ॥ ४.४२॥

गते दिनानां दशके समासके वराश्रमं प्राप्य सपत्रलम्बनम् ।
जिगाय जैत्रान् बहुतर्ककर्कशान् स वासुदेवाह्वयपण्डितादिकान् ॥ ४.४३॥

गुरोः स्वशिष्यं चतुरं चिकीर्षतः प्रचोदनाच्छ्रोतुमिहोपचक्रमे ।
अथेष्टसिद्धिश्छलजातिवारिधिर्निरादरेणापि महात्मनाऽमुना ॥ ४.४४॥

तदाद्यपद्यस्थमवद्यमण्डलं यदाऽवदत् षोडशकद्वयात्मकम् ।
उपर्यपास्तं तदिति ब्रुवत्यसौ गुरौ तमूचे प्रणिगद्यतामिति ॥ ४.४५॥

भवत्प्रवक्तृत्वसमर्थता न मे सकोपमित्थं ब्रुवति व्रतीश्वरे ।
अपीह मायासमये पटौ नृणां बभूव तद्दूषणसंशयाङ्कुरः ॥ ४.४६॥

बुधोऽभिधानं श्रवणं बुधेतरो ध्रुवं विदध्याद्विमुमुक्षुरात्मनः ।
यतिर्विशेषादिति लोकचोदनात् प्रवक्ति मायासमयं स्म पूर्णधीः ॥ ४.४७॥

अखण्डितोपन्यसनं विसंशयं ससम्प्रदायं प्रवचो दृढोत्तरम् ।
समागमञ्छ्रोतुममुष्य साग्रहा जनाः श्रुताढ्याश्चतुरा बुभूषवः ॥ ४.४८॥

गुरोरुपान्ते श्रवणे रतैर्द्विजैः सपञ्चषैर्भागवते कदाचन ।
बहुप्रकारे लिखिते तु वाचिते प्रकारमेकं प्रभुरभ्यधाद् दृढम् ॥ ४.४९॥

परप्रकारेष्वपि सम्भवत्सु ते विनिर्णयोऽस्मिन् कथमित्युदीरिते ।
मुकुन्दबोधेन महाह्रदब्रवीत् प्रकारमेकं भगवत्कृतं स्फुटम् ॥ ४.५०॥

निगद्यतां गद्यमिहैव पञ्चमे जगद्गुरोर्वेत्थ कृतिस्थितिं यदि ।
इति ब्रुवाणे यतिसत्तमे स्वयं तदुक्तमार्गेण जगाद भूरिह्रत् ॥ ४.५१॥

अशेषशिष्यैश्च तदाज्ञया तदा परीक्षणायैक्षि समस्तपुस्तकम् ।
स तत्र हन्तैकतमेस्थितं त्यजन् न तावदध्यायनिकायमभ्यधात् ॥ ४.५२॥

अत्र जन्मनि न यत्पठितं ते जैत्र भाति कथमित्यमुनोक्ते ।
पूर्वजन्मसु हि वेद पुरेदं सर्वमित्यमितबुद्धिरुवाच ॥ ४.५३॥

इति बहुविधविश्वाश्चर्यचित्तप्रवृत्तेः
जगति विततिमायन्नूतनाऽप्यस्य कीर्तिः
क्षपिततततमस्का भास्करीव प्रभाऽलं
सुजनकुमुदवृन्दानन्ददा चन्द्रिकेव ॥ ४.५४॥

इति श्रीमत्कविकुलतिलक त्रिविक्रमपण्डिताचार्यसुत

नारायणपण्डिताचार्यविरचिते श्रीमत्सुमध्वविजये

महाकाव्ये आनन्दाङ्के चतुर्थः सर्गः

पञ्चमः सर्गः

वेदान्तविद्यानिजराज्यपालने सङ्कल्प्यमानो गुरुणा गरीयसि ।
अदभ्रचेता अभिषिच्यते पुरा स वारिभिर्वारिजपूरितैरथ ॥ ५.१॥

आनन्दरूपस्य परस्य पात्रधीरानन्दसन्दायिसुशास्त्रकृत् स यत् ।
आनन्दतीर्थेति पदं गुरूदितं बभूव तस्यात्यनुरूपरूपकम् ॥ ५.२॥

कदाचिदत्रोपययौ यतिः सखा गोविन्दबुद्धेर्बहुशिष्यसंवृतः ।
अमुष्य शिष्या अनुमानशिक्षितास्तदाऽजिगीषन् गुरुबुद्धिमुद्धताः ॥ ५.३॥

भिदा सुसाध्येत्यनुमानमत्र तैः प्रायुज्यताशु प्रतिपक्षभीषणम् ।
अखण्डयद्व्यक्तमखण्डधीरिदं स पक्षदक्षः फणिनं विराडिव ॥ ५.४॥

अथापि मिथ्या विमतं मतत्वतो विवादनिर्मुक्तवदित्यवादि तैः ।
अनेन सत्यं विमतं मतत्त्वतो यथा घटादीत्यनुमा न्यगद्यत ॥ ५.५॥

हेतोरतिव्याप्तिरवादि तैर्यदा सकौतुकैस्तूर्णमसावविस्मयः ।
न शुक्तिरूप्यादि मतं यदन्यथामतं तदित्यादि वदन् जिगाय तान् ॥ ५.६॥

तत्त्वेऽप्यतत्त्वे विमतेऽनुमां वदन् तदप्रतिष्ठां प्रतिपादुकः स्वयम् ।
विजित्य विश्वान् विदुषः सभास्वसौ जगाम नाम्नाऽप्यनुमानतीर्थताम् ॥ ५.७॥

समस्तवादीन्द्रगजप्रभङ्गदश्वरन्नवन्यां प्रतिपक्षकाङ्क्षया ।
वेदद्विषां यः प्रथमः समाययौ सवादिसिंहोऽत्र स बुद्धिसागरः ॥ ५.८॥

तस्योरुदुर्गर्ववतो जिगीषया निशातमादत्त मुकुन्दधीद्रुतम् ।
स्वशिष्यहस्तेन मठान्तरेषुधेः सुपक्षदक्षं सुखतीर्थमार्गणम् ॥ ५.९॥

जैत्रं प्रतिज्ञासु कुतूहलाकुलं नृणां कुलं प्रत्वरितं निशामयन् ।
अवन्दतोपेत्य गुरुं गरिष्ठधीः स रूप्यपीठायतनोत्तमस्थितम् ॥ ५.१०॥

स वादिसिंहस्य गिरं गरीयसीमखण्डयत् पण्डितमण्डलान्तरे ।
तीक्ष्णेन वाक्येन मितेन वेगिना गदां शरेणेव विशारदो मुहुः ॥ ५.११॥

असावसूयन् द्विनवप्रकारतो व्यचीक्रृपत् कञ्चिदथार्थमुच्चकैः ।
जगद्विजेतुश्च जये ससंशयस्तावज्जनोऽजायत पूर्णचेतसः ॥ ५.१२॥

विकल्पकोटीरथ खण्डयन् द्रुतं रेजेऽधिकं स्मेरमुखो बृहन्मतिः ।
तमस्ततीर्वा द्युमणिर्विशुद्धया गवा श्रितो विष्णुपदं सदास्पदम् ॥ ५.१३॥

अगाधमात्मन्यतिवेलमुद्धतं तिरस्कृताशेषसरस्वतीततिम् ।
कामं महामानसकुम्भसम्भवो लघूचकारेत्यपि बुद्धिसागरम् ॥ ५.१४॥

श्व एव वादोऽस्त्विति वादिनौ खलावद्योत्तरं भाति यदीर्यतामिति ।
मध्वे ब्रुवाणेऽमत तौ जितौ जनः स निश्चिकायाथ निशापलायनात् ॥ ५.१५॥

बुद्ध्यब्धिना वादिवरेण चार्जितां जयश्रियं भूपरिवर्तिना चिरात् ।
अहो मुहूर्तादयमप्रयत्नवानवाप्तवानित्यतिविस्मितं जनैः ॥ ५.१६॥

व्याख्यन् कदाचिन्मणिमद्विनिर्मितं भाष्यं जनैस्तर्कविशारदैर्वृतः ।
उवाच वाचं परिहासहासवान् सम्मोदतीर्थः सुरमोददायिनीम् ॥ ५.१७॥

सत्सूत्रभावे प्रविचारिते पृथग्भाष्याभिसन्धौ च विशुद्धबुद्धिभिः ।
निगृह्य गूढाग्रहमुग्रमेतयोर्मान्योऽन्वयोऽन्योन्यमहो न दृश्यते ॥ ५.१८॥

इति ब्रुवाणे प्रतिपादयत्यलं भाष्येऽत्र दोषान् प्रबलान् मुहुर्मुहुः ।
तस्मिंस्तु विस्मेरधियोऽपि यत्नतो न स्थेयसः पर्यहरन्निमानमी ॥ ५.१९॥

नन्वस्य सूत्रस्य परोऽर्थ उच्यतां यद्भाष्यमात्रं भवता निरस्यते ।
भवादृशैर्यः कविभिर्न दूष्यते कथञ्चनेत्यूचुरिमे वचस्विनः ॥ ५.२०॥

अक्लिष्टशब्दान्वयमेष सम्भवत्सूत्रार्थमुच्चैर्वचनं तदाददे ।
मानीकृताम्नाययुतस्मृति क्षणादेष्यत्कथाताण्डवसूत्रधारकम् ॥ ५.२१॥

बुभुत्सया मत्सरवर्जितान् जनान् समत्सरान् वा विजिगीषयाऽऽगतान् ।
श्रुतप्रवीणानतितार्किकान् मुहुर्भङ्ग्याऽनया भङ्गमुपानिनाय सः ॥ ५.२२॥

कदाचिदेनं प्रतिगम्य सौम्यधीः स मध्यगेहार्यवरः प्रसेदिवान् ।
हेतोः कुतश्चिद्विमनीकृतोऽप्यहो गुणाब्धिलुब्धः सुजनः प्रसीदति ॥ ५.२३॥

तेजोऽमृतं नन्दनगात्रपात्रगं नेत्राञ्जलिभ्यामपिबत् सदाऽव्ययम् ।
विद्यासुधां चास्य वचोमहाघटे पूर्णामसौ कर्णपुटेन पण्डितः ॥ ५.२४॥

लीलाविवादे गुरुणा जगद्गुरोः प्रसङ्गतस्तत्र च तादृशे सति ।
सूत्रार्थविच्चेत् कुरुभाष्यमञ्जसेत्याक्षेपपूर्वं गुरुरभ्यधादिमम् ॥ ५.२५॥

विधानमात्रं तदुपाददे तदा पयो यथाच्छं परमः स हंसराट् ।
तल्लीनमाक्षेपमुपैक्षताफलं वारीव सन्तो हि गुणांशतोषिणः ॥ ५.२६॥

वैराग्यवैयात्यसुवाक्त्वपूर्वकैर्युक्तो गुणैः पारमहंस्यभूषणैः ।
ज्येष्ठो यतिर्यो लिकुचान्वयोऽवस्तं भूरिभक्तिः स कदाचिदब्रवीत् ॥ ५.२७॥

विरोधि वेदान्तकृतान्तसम्पदां भाष्यादिकं चेदिदमस्तु का क्षतिः ।
अस्मभ्यमाचक्ष्व विचक्षणोचितं भावं तु सूत्रोपनिषद्विवक्षितम् ॥ ५.२८॥

इत्यस्य वाचा शरदेव भासिता यदाऽखिलाशा शुभपूर्णया बभौ ।
प्रमोदतीर्थाननचन्द्रचन्द्रिका व्याख्याभिधा विष्णुपदप्रकाशिनी ॥ ५.२९॥

जेष्यन् कदाचित् किल कालपालितां दिशं प्रयातोऽच्युतबुद्धिना सह ।
समग्रधीर्मण्डितविष्णुमङ्गलं विष्णुं जगन्मङ्गलमाननाम सः ॥ ५.३०॥

भिक्षाप्रदात्राऽत्र परीक्षितुं मुहुर्दत्ते प्रभुक्ते कदलीफलोच्चये ।
अनेन निर्यत्नमवार्यविस्मयस्तमार्यवर्यं विजनेऽवदद् गुरुः ॥ ५.३१॥

भिक्षावसाने द्विशताधिकैः फलैर्व्यूढैः प्रभुक्तैः परिपूरितेऽपि ते ।
तनूदरे नास्ति गरिष्ठता कथं सुचित्त सत्यं वदताङ्गवानिति ॥ ५.३२॥

अङ्गुष्ठमात्रं जठरे प्रतिष्ठितं जाज्वल्यमानं मम जातवेदसम् ।
नित्यं हितं विश्वदहं च वित्त तं विश्वेशचेता इति सोऽब्रवीत् तदा ॥ ५.३३॥

पर्याकुलानेकसरस्वतीततीन् न्यायोपपन्नान् विविधार्थसंयुतान् ।
अतीत्य देशान् समयांश्च चारुधीरसौ जगामाभिमतेन वर्त्मना ॥ ५.३४॥

स्वहेलया पातितपार्थिवव्रजां धीशुद्धिदां केरलभूषणायिताम् ।
पयस्विनीं प्रेक्ष्य पथि द्विजार्चितां स भाविनीमस्मरदत्र चण्डिकाम् ॥ ५.३५॥

ततः क्रमेण प्रचलन्नुपेयिवानवन्दतेन्दीवरसुन्दरच्छविम् ।

अम्भोजनाभं स भुजङ्गशायिनं श्रीवल्लभं श्रीमदनन्तसत्पुरे ॥ ५.३६॥

वेदान्तसूत्राणि कृतान्तवित्तमो व्याख्यादसौ शिष्यगणाय संसदि ।
विलक्षणं जीवगणाद् गुणार्णवं ब्रह्माच्युताख्यं प्रतिपादयन् मुहुः ॥ ५.३७॥

अप्रांशुनूत्नोपपदाधिवासजः स सङ्करो वैरपरायणः पुनः ।
असूययोचेऽत्र महानतिक्रमः सूत्रार्थवादोऽकृतभाष्यकेष्विति ॥ ५.३८॥

वदोत्तरं भाति यदीह कुर्महे भाष्यं कृतिर्नास्य हि दण्डवारिता ।
जगद्गुरूणामिति तां गुरोर्गिरं जनः समस्तोऽभिननन्द सस्मिताम् ॥ ५.३९॥

प्राज्ञैर्महापूरुषसर्वलक्षणैः सम्पन्नदेहोऽयमितीरिते प्रभौ ।
परे परस्याप्यतिपीनतादृशः स्फिङ्मात्रसंशंसनमत्र चक्रिरे ॥ ५.४०॥

स्फिग्दूषणानि प्रतिपादयत्यलं सम्पूर्णसङ्ख्येऽस्य तु लक्ष्मशास्त्रतः ।
तद्दण्डसङ्खण्डनसंश्रवं व्यधात् तदक्षमोऽसौ प्रकृतिर्हि साऽसताम् ॥ ५.४१॥

स्नात्वाऽत्र तीर्थेष्वचिरेण कन्यकातीर्थे सुतीर्थे सुखतीर्थ आप्लुतः ।
समुद्रसेतौ च निमज्य विष्णवे श्रीरामनाथाय नमश्चकार सः ॥ ५.४२॥

तमाव्रजन्तं यतिवेषमासुरं[3] दण्डं प्रकाश्यैष हसन्नभाषत ।
खण्ड्येत दण्डो यदि चण्ड न त्वया त्वं षण्ढकोऽपण्डित वन्ध्यवागिति ॥ ५.४३॥

लज्जानतः स्वार्थमथार्थयन्नसन्नुपैक्षतासौ द्विजनायकैस्तदा ।
आनन्दयन्तं वदनेन्दुना जगत् तं द्वेष्टि कः प्राज्ञमिहेति वादिभिः ॥ ५.४४॥

या याः प्रसक्ताः परिषत्सु पूरुषैर्विद्याविदग्धैर्विविधैः समागमे ।
स तासु तासु प्रतिभाति भासुरो विद्यासु विद्याधिपतिर्जिगाय तान् ॥ ५.४५॥

अचाल्यमानः स गुरुः स चापलैरसज्जनानामबलीयसामिह ।
उवास मासांश्चतुरो महामनाः सिंहो गुहान्तोपगतः शुनामिव ॥ ५.४६॥

शृङ्गारसिन्धुं स भुजङ्गशायिनं श्रीरङ्गवासं कृतमङ्गलं सताम् ।
अमन्दधीर्दैवमवन्दतागतः कवेरकन्याहिमवायुसेवितम् ॥ ५.४७॥

ततो निवृत्तः परमेव पूरुषं प्रणम्य नानायतनेषु सञ्चरन् ।

[3] यतिवेषधारिणं

प्रकाशयन् स्वातिशयानमानुषानाशामुदीचीं प्रययावसौ क्रमात् ॥ ५.४८॥

ततस्ततो विस्मितलोचनैर्नरैर्निरीक्ष्यमाणोऽतिसुलक्षणाकृतिः ।
ग्रामोत्तमान् प्राप्य पयस्विनीतटे विवेश देवायतनं स किञ्चन ॥ ५.४९॥

अधीत्य धर्मेण षडङ्गमागमं तदर्थसंवर्णननिर्णयान्विताः ।
प्रापुर्द्विजेन्द्रास्तमपूर्वपूरुषं जिज्ञासवः सुप्रथितं जगत्त्रये ॥ ५.५०॥

सुस्मितेन्दुमरविन्दलोचनं स्वर्णवर्णमतिभद्रभाषणम् ।
वीतभूषमपि विश्वभूषणं तं दिदृक्षुरलमापतज्जनः ॥ ५.५१॥

विद्योरुद्युतिधीरतारकतिरस्कारे पतङ्गायितो
दुर्वादीभकुतर्ककुम्भदलने सिंहप्रबर्हायितः ।
लोलालोककलोकदृङ्कुमुदिनीसंह्लादनेऽब्जायितः
संसन्मण्डलमण्डनायितवपुः स्वानन्दतीर्थो बभौ ॥ ५.५२॥

इति श्रीमत्कविकुलतिलक त्रिविक्रमपण्डिताचार्यसुत

नारायणपण्डिताचार्यविरचिते श्रीमत्सुमध्वविजये

महाकाव्ये आनन्दाङ्के पञ्चमः सर्गः

षष्ठः सर्गः

ऐतरेयमथ किञ्चन सूक्तं सूचयन् सदसि तत्र गरिष्ठः ।
श्रोतुमिच्छति सभा भगवद्भ्यः सूक्तभावमिति तावदुवाच ॥ ६.१॥

वर्णसौष्ठवगरिष्ठमतूर्णं तुल्यमात्रमतिमात्रसुलक्ष्म ।
व्यूढहृज्जलदघोषममुष्योच्चारणं विदधदभ्यधितार्थम् ॥ ६.२॥

लक्षणान्विततया वचनेऽस्मिन् देवतागुरुमसावतिशेते ।
मानमित्यपि विधाय धिया ते तत्तु सूक्तमपरार्थमवोचन् ॥ ६.३॥

स्यात् तथेत्थमपि सम्भवितार्थस्त्र्यर्थतां श्रुतिषु वित्त दशार्थम् ।
भारतं ननु शतार्थमपि स्याद्द्विष्णवं पदसहस्रतयं हि ॥ ६.४॥

इत्युदीरयति विस्तृतचित्ते भूसुरा इह जिगीषव एनम् ।
ऊचुरर्थशतकं हरिनाम्नां वर्ण्यतामिति सहासमुखास्ते ॥ ६.५॥

वर्णयामि तदहं सकलं वः सौष्ठवादनुवदन्तु भवन्तः ।
तं वदन्तमिति तेऽथ वदन्तो बाढमित्यतिदृढोद्यममापुः ॥ ६.६॥

प्रत्ययप्रकृतिसङ्गमभङ्गीं शब्दशास्त्रविहितां प्रतिदृष्य[4] ।
शुद्धधीः श्रुतिशिरःशतसिद्धानभ्यधात् सपदि विश्वपदार्थान् ॥ ६.७॥

यावदर्थशतकं न विशङ्कः सन्ततोक्तिकृदपूरयदेषः ।
वर्णितावधृतिदुर्बलचित्तास्तावदाकुलहृदो ह्यभवंस्ते ॥ ६.८॥

साङ्गवेदचतुरा इतिहासे शिक्षिताः सुबहवोऽप्यतिधृष्टाः ।
नैतदीरितमहो जगृहुस्ते विश्वसङ्क्षयपयोऽन्धुगणा वा ॥ ६.९॥

देवतास्वसुलभा प्रतिभा ते मानुषेषु चपलेषु कथा का ।
क्षाम्य सौम्य सकलज्ञ नमस्ते ते ब्रुवन्त इति तं किल नेमुः ॥ ६.१०॥

वेदशास्त्रचतुरैरिह विद्यावित्तलिप्सुभिरवाप्तमशेषैः ।

[4] प्रतिदर्श्य

प्राप केरलसुमण्डलजातैरन्यदायतनमायतचेताः ॥ ६.११॥

तर्कतन्त्रकुशलानपि पुंसश्चर्करीति बत सोऽयममानान् ।
मानमानमयतीह कथं नो नैषमण्डलभुवां समितानाम् ॥ ६.१२॥

मन्त्रयन्त इति ते द्विजवर्या अन्यदेशजमुखास्तमपृच्छन् ।
सद्दददसुशंसननिन्दाकारिसूक्तगतमर्थमुपेत्य ॥ ६.१३॥

तं स्फुटं प्रकटयन्[5] स पृणीयाच्छब्दमूलमवदत् पृणधातुम् ।
तं जिगीषुमथ विप्रमदः प्रीङ्धातुमेष निगदन्तमुवाच ॥ ६.१४॥

प्रादिभेदमविदन् गुणय त्वं मूढ पांसुषु लिखन् लिपिसङ्घम् ।
भर्त्सयन्निति जहास सुहासो मत्सराकुलधियो जडयन् सः ॥ ६.१५॥

तत्प्रसङ्गबलतोऽखिलविद्यापाटवं पृथुहृदः प्रतिबुध्य ।
आनमन् सबहुमानममी तं यं नमन्ति किल नाकिनिकायाः ॥ ६.१६॥

कन्यकादृतसुरेन्द्रवपुःश्रीदानवाचिवरसूक्तहृदुक्तौ ।
कुत्रचित् सदसि तावदपाला कीर्तिताऽतितरुणीत्ययमूचे ॥ ६.१७॥

स्त्रिवृणी भवति तत्पदवाच्येत्याग्रहेण वदतो विदुषोऽत्र ।
कश्चिदेष्यति विपश्चिदिहैनं पृच्छतेत्ययमगच्छदथोक्त्वा ॥ ६.१८॥

देशमेनमचिरादुपयातस्तादृशाकृतिरहो कृतबुद्धिः ।
तांस्तथाभ्यधित तत्पदभावं सूरिमौलिमणिनाऽत्र यथोचे ॥ ६.१९॥

केवलं न सकलाः श्रुतिविद्या मानपूर्वकसमस्तगिरोऽस्य ।
अप्यनागतगतप्रतिपत्तिं श्रद्दधुः पृथुलचेतस एते ॥ ६.२०॥

यद्यदेव सपदि प्रकृतं स्यात् तत्तदेष यदवेदखिलञ्च ।
सर्वदा सदसि सर्वबुधानां सर्वविद्यतिरिति प्रथितोऽभूत् ॥ ६.२१॥

अप्रयातमपि देशमशेषं व्यानशे सुजनकैरवबन्धुः ।
पूर्णदृक् प्रततया निजकीर्त्या पूर्णचन्द्र इव चन्द्रिकयाऽलम् ॥ ६.२२॥

सुन्दरेषु सुरमन्दिरवृन्देष्विन्दिरारमणवन्दनकृत्यम् ।

[5] प्रकथयन्

आचरन्न सुचिरात् सुविचारो रौप्यपीठपतिमाप मुकुन्दम् ॥ ६.२३॥

भूसुरप्रवरबुद्धिसमृद्धिव्यक्तयुक्तवपुषं रुचिराङ्गीम् ।
सूत्रदीप्तमणिमालिकयाऽलं भूषितां भुवनभूषणभूताम् ॥ ६.२४॥

पादसुन्दरपदक्रमभावैर्भासितां प्रकटवर्णगुणाढ्याम् ।
भारतोत्तमभृतामनुरूपाच्छादनां समधिकस्वरशोभाम् ॥ ६.२५॥

राजसूयमुखसन्मखवृत्तां वासुदेवगुणनिष्ठितभावाम् ।
सर्वधर्मपरिशिक्षणदक्षां वन्दितां जनतया जननीवत् ॥ ६.२६॥

मौलिसङ्ग्रहविकर्षणदूनां मायिना सदसि दुष्टजनेन ।
न्यायमार्गमपहाय महान्तं स्वेश्वरत्वमपि साधयताऽलम् ॥ ६.२७॥

सज्जनैः कतिपयैरतिदीनैश्चालितैः कलिबलाच्छुभमार्गात् ।
अप्युपेक्षितविकर्षणदुःखां सातिशोकमपि कैश्चन दृष्टाम् ॥ ६.२८॥

वासुदेव धरणीधर नाथेत्युच्चकैरपि मुहुः प्रवदन्तीम् ।
पूर्णषड्गुणमजं गतदोषं बिभ्रतीं हृदि विविक्तमशेषात् ॥ ६.२९॥

वार्यतां बुधजनैर्ननु हा हा नैष धर्म इति चाभिदधानाम् ।
कृष्णलालिततमामनवद्यामप्यनन्यशरणां शरणोत्काम् ॥ ६.३०॥

वेदिजामिव पुरा भरताग्र्यः स स्वयं श्रुतिततिं खलु दृष्ट्वा ।
पुष्टबुद्धिरकरोत् करुणाब्धिर्दुष्टपक्षदमनस्थिरसन्धाम् ॥ ६.३१॥

अव्ययं सततमप्युपभुक्तया वित्तमग्र्यमिव दूरयियासुः ।
ज्यायसे सगुरवे हरिगीताभाष्यमेष विरचय्य तदादात् ॥ ६.३२॥

हेतुवादिनि विशङ्कटबुद्धौ तीर्थमर्थयति गन्तुमनुज्ञाम् ।
तां ददेश पुरुषोत्तमतीर्थश्चिन्तयन् स पुरुषोत्तमरक्षाम् ॥ ६.३३॥

नीरजा मलयमण्डलवृत्त्या श्लाघितो भुवि सदाल्यनुयातः ।
साधुपान्थपरितापमपास्यन्नुत्तरां दिशमयान्मरुदंशः ॥ ६.३४॥

बुद्धिशुद्धिकरगोनिकराढ्यं तीर्थजातमुभयं च धरण्याम् ।
आत्ममज्जनत एव निकामं पर्यशोधयदमन्दमनीषः ॥ ६.३५॥

वासुदेवपदसन्ततसङ्गी तेजसाऽप्यलमधःकृतशर्वः ।
अत्यवर्तत नितान्तमथासौ गाङ्गमोघमघनाशनकीर्तिः ॥ ६.३६ ॥

तत्र तत्र स जगत्त्रयचित्रं कर्म शर्मदमनुस्मृतिमात्रात् ।
सञ्चरन् विदधदाप नराणां गोचरं बदरिकाश्रमपार्श्वम् ॥ ६.३७ ॥

मण्डयन् भरतखण्डमखण्डं नादिरायणपदोऽत्र परो यः ।
तं नमन् प्रचुरधीर्हरिगीताभाष्यमार्पयदुपायनमस्मै ॥ ६.३८ ॥

प्रीतयेऽस्य पुरतो वरभाष्यं वाचयन् स जनतामपसार्य ।
वच्मि शक्तित उरुक्रमगीताभावमित्यकथयत् पुरुसङ्ख्यः ॥ ६.३९ ॥

एतदर्थमपि सूक्ष्ममपि त्वं शक्त एव न यदात्थ समस्तम् ।
तेन लेशत इतीह पदं स्यादित्यगद्यत जगज्जनकेन ॥ ६.४० ॥

तेन तत्प्रवचने विहितेऽलं शुश्रुवुः प्रशयिता अपि शिष्याः ।
उच्यतामिति मुहुः सपृथिव्यास्फालनं पदमहो हरिणोक्तम् ॥ ६.४१ ॥

शब्दभेदमवधार्य तमर्चासन्निषण्णवपुषः परमस्य ।
तस्य भावविददभ्रमनीषः प्रोत्थितः प्रवचनं व्यधितैभ्यः ॥ ६.४२ ॥

मज्जनं व्यधित शीतलगङ्गावारि नित्यमरुणोदयकाले ।
यत् स्पृशन्ति न नरा हिमभीता अंश एष पृषतामधिपस्य ॥ ६.४३ ॥

काष्ठमौनमदधादुपवासं शुद्धमप्यकृत शुद्धहृदिच्छन् ।
नित्यतुष्टहरितोषविशेषं चिन्त्ययन् प्रभुमनन्तमठान्तः ॥ ६.४४ ॥

प्रैरयत् स्वचरणे रतचित्तं मध्वमत्र दिनमण्डलमेनम् ।
स्वाश्रमोपगमनाय मुकुन्दो दीप्तिदृष्टिविदितागतिरन्यैः ॥ ६.४५ ॥

नक्तमेव भगवत्युपयाते प्रोदिते सति सहस्रमरीचौ ।
मौनवानलिखदुत्तमचित्तः शिष्यशिक्षणपरः करुणावान् ॥ ६.४६ ॥

नेदृशं स्थलमलं शमलघ्नं नास्य तीर्थसलिलस्य समं वाः ।
नास्ति विष्णुसदृशं ननु दैवं नास्मदुक्तिसदृशं हितरूपम् ॥ ६.४७ ॥

याति तावदधुनैव जनोऽयं व्यासरूपमजितं प्रदिदृक्षुः ।
आव्रजेदिह न वा स हि वेद स्वस्ति वोऽस्त्विति ययावथ मध्वः ॥ ६.४८॥

नाथ नाथ बत नोऽत्र विनाथान् मा त्यजोरुकरुणो भगवंस्त्वम् ।
नोदितं स्मृतमपीति हि शिष्यैः स्वामिनोऽभिमतभङ्गभयेन ॥ ६.४९॥

सद्गुरोर्न विरहं सहमानः सत्यतीर्थयतिरन्वगमत् तम् ।
यस्त्रिवारमितरासुतशाखास्वर्थमग्र्यमशृणोत् पुरुसङ्ख्यात् ॥ ६.५०॥

दुर्गमार्गगतमप्यनुधावन् नाप सोऽयमरुणीभवतीने ।
लीलया सजवमाक्रममाणं व्याश्रयान्तरसुदूरशिलासु ॥ ६.५१॥

आनिवृत्तवपुषा गुरुणाऽऽरात् पाणिना ह्यभिनयेन सुनुन्नः ।
त्रस्तधीरतिययौ स मुहूर्तात् तद्दिनोपगतमार्गमशेषम् ॥ ६.५२॥

आश्रमे निजजनानिह दृष्ट्वा तं प्रसादमहिमानममुष्य ।
प्रोच्य तत्स्रवनमप्यतिचित्रं तस्य तैः सह सदाऽस्मरदेषः ॥ ६.५३॥

वानरेन्द्र इव वायुजवोऽसौ भीमसेन इव दानवभीमः ।
उल्ललास गिरिपुङ्गवशृङ्गे स व्रजन् वृजिननाशननामा ॥ ६.५४॥

बहुसत्वगणं सविकं समहाविषमोक्षमहाहिमवन्तमयम् ।
विषमोक्षमहाहिमवन्तमयन् नगमैक्षत फुल्लदृगस्तभयः ॥ ६.५५॥

सुहसितकमलाकरोपगूढं सुजनसुखार्थमनन्तभोगशय्यम् ।
विकसितसुमनोघटागमुच्चं मरकतरत्नमयस्थलाग्र्यशोभम् ॥ ६.५६॥

पादोपान्तनमन्महामुनिगणं हेमप्रदीप्ताम्बरम् ।
श्रीमद्रत्नकलापमग्र्यकटकैर्विभ्राजितं हाटकैः ।
दृष्ट्वा तं धरणीधरं सुवनमालोल्लासिनं सुन्दरम् ।
स्वानन्दाकृतिमस्मरन्मुररिपुं स्वानन्दतीर्थस्तदा ॥ ६.५७॥

इति श्रीमत्कविकुलतिलक त्रिविक्रमपण्डिताचार्यसुत

नारायणपण्डिताचार्यविरचिते श्रीमत्सुमध्वविजये

महाकाव्ये आनन्दाङ्के षष्ठः सर्गः

सप्तमः सर्गः

अथ हैमवते तटान्तरे बदरीषण्ढविशेषमण्डितम् ।
परमाश्रममाश्रयं श्रियः सकलज्ञः स ददर्श विश्रुतम् ॥ ७.१॥

हिमवर्षरविप्रभासहाः पृथुसत्रप्रथिता द्विजाश्रयाः ।
अपि विष्णुपदस्पृशोऽलसन्नुभये यत्र विचित्रशाखिनः ॥ ७.२॥

श्रवणामृतगीर्गणैर्द्विजैः शुकमुख्यैः शुभपक्षिभिर्युतम् ।
कमलेष्टतमस्थिरान्तरैरपि हंसैः परमैरमेचकैः ॥ ७.३॥

सुमनोनिकरेण पूरितं स्वमनोऽभीष्टदमल्पदुर्गमम् ।
अपरस्परमत्सरप्रजं ननु वैकुण्ठमिवाच्युतालयम् ॥ ७.४॥

तमिमं प्रविशन्तमाश्रमं द्व्यधिकत्रिंशदुदारलक्षणम् ।
गुणसारविदः कुतूहलादवलोक्यर्षय इत्यचिन्तयन् ॥ ७.५॥

कनकातुलतालसन्निभः कमलाक्षो विमलेन्दुसन्मुखः ।
गजराजगतिर्महाभुजः प्रतियान् कोऽयमपूर्वपूरुषः ॥ ७.६॥

अतिशान्तवपुर्निशाकरः स्वयमेकान्तखरो दिवाकरः ।
इति नास्य गुणार्णवाकृतेरुपमानं भुवनेषु लभ्यते ॥ ७.७॥

परमाश्रमिणां गतश्रमो ननु चिह्नानि बिभर्ति धीरधीः ।
अपि मानुषभावविग्रहो विपुलं विस्मयमातनोति नः ॥ ७.८॥

चतुरश्चतुराननः स्वयं पवनो वा व्रतिरूप आव्रजन् ।
श्रुतिनाथदिदृक्षयाऽन्यथा न खलु स्यान्निखिलाग्र्यलक्ष्मवान् ॥ ७.९॥

अवलोकितलक्षणः स तैरिति सञ्चिन्त्य कुतूहलाकुलैः ।
अविलम्बगतिर्न्यशामयत् तरुमारात् सुरपादपोत्तमम् ॥ ७.१०॥

मसृणत्वचमुन्नतं ततं बहुशाखाफणसूनरत्नकम् ।
भगवन्तमनन्तमन्तिके स्थितमीशस्य निषेवणाय वा ॥ ७.११॥

अतिचित्रविचित्रपत्रिणं बहुवर्णं हरिगोनिवारकम् ।
मुनिनन्दनमिन्दिरापतेरधिकेष्टं पतताामिवाधिपम् ॥ ७.१२॥

अमृतात्ममहाफलप्रदं दुरवापं हरिभक्तिवर्जितैः ।
श्रितसाधुपुराणभारतं निगमं मूर्तमिवोरुशाखिनम् ॥ ७.१३॥

अथ तस्य स वेदिकान्तरे सुविशाले विमले मनोहरे ।
अवलोकितवाननन्तधीर्दिवि देवानिव तापसोत्तमान् ॥ ७.१४॥

अपि सप्ततया विराजितान् गतसङ्ख्यान् गुणिनो गुणोज्झितान् ।
अपि मन्युमदादिवर्जितान् गतभोगान् पवनाशनान् सदा ॥ ७.१५॥

मुनिमण्डलमध्यवर्तिनं त्रिजगन्मण्डलमण्डनायितम् ।
इह सत्यवतीसुतं हरिं परिपूर्णप्रमतिः समैक्षत ॥ ७.१६॥

निजहृत्कमलेऽतिनिर्मले सततं साधु निशामयन्नपि ।
अवलोक्य पुनः पुनर्नवं तमसौ विस्मित इत्यचिन्तयत् ॥ ७.१७॥

अगणेयगुणार्णवो[6]ऽमलः स हि नारायण एष केवलम् ।
विधिनाऽनुसृतं पराशरात् सुषुवे सत्यवती किलात्र यम् ॥ ७.१८॥

धवलेऽस्य मनःपयोनिधौ सदनुक्रोशगिरीन्द्रलोलिते ।
प्रकटीभवति स्म सुन्दरी दयिता दैत्यरिपोस्त्रयीमयी ॥ ७.१९॥

इत एव पुराणगौरगौ समहाभारतपारिजातके ।
सति जातवति व्यजायत प्रवरं सूत्रगणामृतं स्वयम् ॥ ७.२०॥

निरवग्रहमुर्वनुग्रहं विदधत् पाण्डुसुतादिसज्जने ।
अवनाववनाय संविदां सुचिरायैष चचार चारुगीः ॥ ७.२१॥

अधुना कलिकालवृत्तये सवितेव क्षणदानुवृत्तये ।
जनदृग्विषयत्वमत्यजङ्गवानाश्रममावसन्निमम् ॥ ७.२२॥

तदिदं वपुरस्य दृश्यते दलितेन्दीवरसुन्दरद्युति ।
परमाजिनयोगपीठगं मम चेतोनयनाभिनन्दनम् ॥ ७.२३॥

[6] अगण्यगुणार्णवो

अगणेयगुणैः सुपूरितं परिपूर्णागणितात्मसद्गुणैः ।
इदमस्तसमस्तदूषणं सचिदानन्दमयं हि केवलम् ॥ ७.२४॥

कमलाकमलासनानिलैर्विहगाहीन्द्रशिवेन्द्रपूर्वकैः ।
पदपद्मरजोऽस्य धारितं शिरसा हन्त वहाम्यहं मुहुः ॥ ७.२५॥

प्रणमामि पदद्वयं विभोर्ध्वजवज्राङ्कुशपद्मचिह्नवत् ।
निजमानसरागपीडनादरुणीभूतमिवारुणं स्वयम् ॥ ७.२६॥

ननु केवलमेव वैष्णवं श्रितवन्तः पदमात्मरोचिषा ।
तमसोऽप्युभयस्य नाशका विजयन्ते नखरा नवं रविम् ॥ ७.२७॥

सुकुमारतलाङ्गुलीमतोः पदयोरस्य निगूढगुल्फयोः ।
उपमानमहो न दृश्यते कविवर्यैरितरेतरं विना ॥ ७.२८॥

उचितां गुरुतां दधत् क्रमाच्छुचि तेजस्वि सुवृत्तमुत्तमम् ।
भजतोऽत्र च भाजयत्यदो विभुजङ्घायुगलं सरूपताम् ॥ ७.२९॥

अचलासनयोगपट्टिका वरकक्ष्या सकृदाप्तमिष्टदम् ।
परितोऽपि हरिं स्फुरन्त्यहो अनिशं धन्यतमेति मे मतिः ॥ ७.३०॥

रुचिरेण वरैणचर्मणा रुचिराजद्युतिचारुरोचिषा ।
परमोरुनितम्बसङ्गिना परमाश्चर्यतया विराजते ॥ ७.३१॥

तनुनिम्नसुनाभिशोभिते वलिभे वारिजनाभ आदधे ।
प्रतनावतिसुन्दरे मृदावुदरेऽस्मिन् जगदण्डमण्डलम् ॥ ७.३२॥

हृदये कृतसज्जनोदये सुविशाले मुनिवंशशेखरः ।
उभयं वहति त्रयीमयं विमलं ब्रह्मसुसूत्रमुत्तमम् ॥ ७.३३॥

असमेऽनधिके सुसाधिते निजताते रविराशिदीधिति ।
प्रददौ त्रिजगज्जयध्वजं विधिरेतद्गलसङ्गिभूषणम् ॥ ७.३४॥

अरिवारिजलक्षणोल्लसत्सुकुमारारुणपाणिपद्मयोः ।
पृथुपीवरवृत्तहस्तयोरुपमां नैव लभामहेऽनयोः ॥ ७.३५॥

भजतां वरतर्कमुद्रया द्यति हस्ताग्रमबोधमीशितुः ।
अधिजानु समर्पितं परं कृतभूयोभयभङ्गमङ्गलम् ॥ ७.३६॥

सततं गलता स्वतः श्रुतित्रितयेनैव निकाममङ्कितः ।
सुविडम्बितकम्बुरीक्ष्यते वररेखात्रयवान् गुरोर्गलः ॥ ७.३७॥

सकलास्तकलङ्ककालिमस्फुरदिन्दुप्रकरोरुविभ्रमम् ।
अधरीकुरुते स्वशोभया वदनं देवशिखामणेरिदम् ॥ ७.३८॥

अरुणाश्मदलान्तरोल्लसन्नवमुक्तावलिमस्य लज्जयेत् ।
हसतः सितदन्तसन्ततिः परमश्रीररुणोष्ठरोचिषः ॥ ७.३९॥

द्विजवृन्दकृतं कुतूहलाद्[7] अनुयोगान्धुसहस्रमुत्तमम् ।
इयमेकपदे सरस्वती श्रुतिभर्तुः परिपूरयत्यहो ॥ ७.४०॥

जलजायतलोचनस्य मामवलोकोऽयमुपेत्य लालयन् ।
कुरुते परिरभ्य पूरितं भुवनानन्दकरस्मितान्वितः ॥ ७.४१॥

उपकर्णममुष्य भासिता तुलसी मन्त्रयतीव लालिता ।
मम नाथपदं न मत्सराज्जलजाद्यानि हरेयुरित्यलम् ॥ ७.४२॥

विभवाभिभवोद्भवादिकं भुवनानां भुवनप्रभोर्भ्रुवोः ।
अनयोरपि दभ्रविभ्रमात् सभवाम्भोजभवात्मनां भवेत् ॥ ७.४३॥

त्रिजगत्तिलकालिकान्तरे तिलकोऽयं परभागमाप्तवान् ।
हरिनीलगिरीन्द्रमस्तकस्फुटशोणोपलपङ्क्तिसन्निभः ॥ ७.४४॥

नवमम्बुधरं विडम्बयद्वरविद्युद्वलयं जगद्गुरोः ।
अवलोक्य कृतार्थतामगां सजटामण्डलमण्डनं वपुः ॥ ७.४५॥

न रमाऽपि पदाङ्गुलीलसन्नखधूराजदनन्तसद्गुणान् ।
गणयेद्गणयन्त्यनारतं परमान्[8] कोऽस्य परो गुणान् वदेत् ॥ ७.४६॥

न कुतूहलिता कुतूहलं तनुमेनामवलोक्य सद्गुरोः ।
सनवावरणाण्डदर्शिनो गृहबुद्ध्या मम निष्कुतूहलम् ॥ ७.४७॥

[7] महादराद्
[8] मतिमान्

इति चिन्तयता महाधिया पदवीं बाह्यगतामतीयुषा ।
समनोनयनैः पुरागतस्तत आपे वपुषाऽपि वेदराट् ॥ ७.४८॥

गुरुभक्तिभरानताकृतिर्विरचय्याञ्जलिबन्धमञ्जसा ।
क्षणमामुकुलीकृतेक्षणः स गुरुं केवलमभ्यवन्दत ॥ ७.४९॥

विनयाभरणेन भूषितः स्फुटमष्टाङ्गविशिष्टचेष्टितः ।
भगवत्तमपादपङ्कजे भगवान् स प्रणनाम भाग्यवान् ॥ ७.५०॥

स निरीक्ष्य पराशरात्मजः प्रणतं प्रेष्ठमशेषसद्गुणैः ।
करयोर्युगलेन वल्गुना तमुदस्थापयदाशुपातिना ॥ ७.५१॥

अमितप्रमतिं श्रुतीश्वरः परिरेभे परिगृह्य तं दृतम् ।
प्रणयामृतपूर्णमानसः स्मितवक्त्रः परिफुल्ललोचनः ॥ ७.५२॥

यमजाम्युदवाह ऊर्जितो यदि जाम्बूनदवारि संव्रजेत् ।
कनकद्युतिमध्वसङ्गवानुपमीयेत स तेन नीलभाः ॥ ७.५३॥

यदि राजविभूषणैर्युतौ द्विजवर्यान्वयजाविमौ हरी ।
नृपगोत्रभुवोः पुराऽऽत्मनोः स्फुटतुल्यावुपगूढयोर्मिथः ॥ ७.५४॥

इदमाप शुकोऽपि लालनं न समग्रं जगतां पितुः पितुः ।
अलभीष्ट यदेष धन्य इत्यतिकौतूहलमापि तापसैः ॥ ७.५५॥

अमुष्य शिष्या विनयेन तस्मै गुरोरभिप्रायविदो विदग्धाः ।
तदानुरूपं ददुरासनं ते चतुर्मुखायेव मुकुन्ददासाः ॥ ७.५६॥

आस्यतामित्युदीर्योपविष्टे सत्यवत्याः सुते सत्यवाचि ।
मानयन्[9] मन्दहासावलोकैस्तान्मुनीन्द्रानिहोपाविशत्सः ॥ ७.५७॥

अवगम्य तं मुनिगणा वरिष्ठतो
विधिवद्व्यधुर्विधिविदोऽस्य माननाम् ।
अपि सङ्कथा श्रुतिसुखाः कवीन्द्रयो
रनयोर्निशम्य परमां मुदं ययुः ॥ ७.५८॥

[9] नन्दयन्

सज्ज्ञानायानन्दविज्ञानमूर्ती प्राप्तौ पृथ्वीमाश्रमे तत्र तावत् ।
जाज्वल्येते विष्णुवायू स्म देवौ वेदव्यासानन्दतीर्थाभिधानौ ॥ ७.५९ ॥

इति श्रीमत्कविकुलतिलक त्रिविक्रमपण्डिताचार्यसुत

नारायणपण्डिताचार्यविरचिते श्रीमत्सुमध्वविजये

महाकाव्ये आनन्दाङ्के सप्तमः सर्गः

अष्टमः सर्गः

प्रतिभाप्रभाप्र[10] मुखसद्गुणैर्निजैरतिविस्मयं नियमिनां मनो नयन् ।
पुरुधीः कदाचिदथ वेदनायकं विजने शनैरुपससाद तं वने ॥ ८.१॥

सुविशेषशेषवदशेषवर्णितप्रतिबोद्धुरस्य ननु शिष्यतोचिता ।
गुरुमानसस्य गुरुतापि सत्पतेरिति सोपसत्तिरमरैरमान्यत ॥ ८.२॥

पुर एव पूरितमपूरयत् पुनर्ननु कृष्ण एष परमार्थसङ्ख्यया ।
भगवन्मनः पुरमिवायतं पुरा निजधाम तां च जगृहे तदद्भुतम् ॥ ८.३॥

इतिहाससुन्दरपुराणसूत्रसत्प्रियपञ्चरात्रनिजभावसंयुतम् ।
अशृणोदनन्तहृदनन्ततोऽचिरात् परमार्थमप्यगणितागमावलेः ॥ ८.४॥

ऋजुपुङ्गवस्य परिजानतः स्वयं सकलं तदप्यलमनन्तजन्मसु ।
स्वकृतोर्वनुग्रहबलादमुष्य तां विशिशेष शेषशयनः पुनर्धियम् ॥ ८.५॥

अथ बादरायणसहायसम्पदा प्रययौ प्रणेतु[11] ममितान्तरो युतः ।
अपि नादिरायणपदोदितं हरेर्वपुरन्तरं लसितमाश्रमान्तरे ॥ ८.६॥

तमपश्यदाश्रमवरे प्रभूतधीर्ज्वलनं ज्वलन्तमिव धूमवर्जितम् ।
वरवल्कलाकलितमौञ्जिमेखलं विलसज्जटावलयमादिपूरुषम् ॥ ८.७॥

अतिदुर्जयेन्द्रियजयादिरूपिणा तपसा वसन्तमिव सन्ततं वने ।
निजरूपभूतनिरपेक्षनिर्मलप्रचुरात्मसौख्यरतमप्यनारतम् ॥ ८.८॥

नयनद्वयेन नलिनप्रभामुषा परिफुल्लताविलसितेन विस्मयात् ।
तमवेक्ष्य धर्मजमधर्मदुर्लभं मनसेति भूरितरमानसोऽस्मरत् ॥ ८.९॥

जगतां चतुर्दशतयं चतुर्मुखप्रमुखैर्युतं प्रळयमानिनाय यः ।
सममुल्लसन् कमलयैव केवलं परमः स एष हि पुराणपूरुषः ॥ ८.१०॥

---

[10] प्रतिभाप्रभाव
[11] प्रणन्तु

त्रिगुणाकृतिप्रकृतितो महत्ततस्त्रिविधामहङ्कृतिममर्त्यखान्यतः ।
अपि भूतपञ्चकमितोऽण्डमण्डलं भगवानसाविह जगन्ति चासृजत् ॥ ८.११॥

विधिवायुवीन्द्रशिवकौशिकेशकानमरामरानुगनरासुरादिकान् ।
सृजति प्रपालयति हन्ति सन्ततं स्वगतिं प्रयापयति चैष लीलया ॥ ८.१२॥

अगणेय[12]सद्गुणगणो विदूषणः स्ववशाखिलोऽप्यनुपचारतः स्वयम् ।
स्मृतिकीर्तनप्रणतिभिर्विमुक्तये स्वजनस्य यात्ययमनेकरूपताम् ॥ ८.१३॥

चतुराननाय चतुरः पुराऽऽगमान् प्रददावसावनिमिषेश्वरः प्रभुः ।
विनिहत्य हि श्रुतिमुषं पुरातनं वपुषोद्धृतं हयमुखेन सद्रिपुम् ॥ ८.१४॥

अमरेन्द्रवैरिभुजदण्डमण्डलप्रतिकर्षपुष्करपतद्धरोद्धृतिः ।
विदधे वराहवपुषाऽमुनोर्मिमत्सृतिसिन्धुकच्छपतयाऽऽप्तरक्षिणा ॥ ८.१५॥

नरसिंह एष विददार दारुणं प्रतिघोदये नखरचक्रतेजसा ।
स्वरिपुं क्षणेन सरसः स्फुरत्तनुं पृथुसत्त्वमिष्टजनभीतिभञ्जनः ॥ ८.१६॥

अपि वामनो ललितबाल्यवानयं प्रतिभाबलेन कृतदैत्यकौतुकः ।
उपधेरधः कृतबलीन्द्रशात्रवः स्वजनाय केवलमदात् परं पदम् ॥ ८.१७॥

कथयन्त्यमुं परशुभासमानगोहतमर्त्यदेवतमसं मुहुर्मुहुः ।
जगतां हितं हरिमिवापरं हरिं गुरुशक्तितापसवरान्वयोद्भवम् ॥ ८.१८॥

करुणाकरः स वसुदेवमोददो भगवान् पुरा हिमकरान्वयेऽभवत् ।
जितवान् दिशो दशरथोग्यसम्पदो जनको बभूव भुवि यस्य वैरिहा ॥ ८.१९॥

भुजगेश्वरोऽपि भुवनेश्वरप्रियः समजन्यथारिदरजन्मभुव्यभूत् ।
तममुष्य कान्तिविजितेन्दुमग्रजं रमणीयमाहुरिह रामनामकम् ॥ ८.२०॥

जनकेन सोऽथ विरहासहिष्णुना मुहुरीक्षितो वनमनीयत प्रभुः ।
चकितेन दुष्टजनतस्तपस्विना तत आसुरीं निशिचरीं जघान सः ॥ ८.२१॥

मुनिसप्ततन्तुकृतवैरबन्धनं कटुकेश्यरिष्टपदमुख्यदुर्जनम् ।
क्षपयन्तमुद्यतसुबाहुमाहवे तमथाभ्यनन्ददमरादिसङ्गणः ॥ ८.२२॥

---

[12] अगणय्य

सवने विकस्वरगुणस्वरद्विजे स्फुरिते चरन् सकलगोकुलप्रियः ।
इतकामतापसरसार्द्रधीगिरः प्रतिलालयन्नरमतैष सुन्दरीः ॥ ८.२३॥

सहजान्वितः सकलमित्रसंयुतो मधुरां पुरीं जनकवल्लभां गतः ।
प्रविशन्निमां स जगदेकसुन्दरो नरनार्युदारनयनोत्सवोऽभवत् ॥ ८.२४॥

अथ खण्डितेश्वरधनुः स लीलया क्षपितोग्रसेननृपपुत्रपौरुषः ।
समुपास्य विप्रगुरुमब्जभूगुरुः स्वजनानमोदयदमेयतेजसा ॥ ८.२५॥

कमलामयं कमलपत्रलोचनां भुवमागतां नृपसुतां गृहीतवान् ।
निजलीलया विजितराजशात्रवो मुदमापदाप्य पुरमब्धिदुर्गमम् ॥ ८.२६॥

स जगाम मातृजनतुष्टये किल त्वरितोवनं[13] विदधदीप्सितं सताम् ।
सह भार्ययाऽपि शुभया महाजयध्वजलक्ष्मणाग्र्यसुहृदा विना मुदा ॥ ८.२७॥

समतीतपर्वतपुरोगदुर्गमः खरदूषणादिसुजनद्विषो बहून् ।
स निहत्य विश्वभयदं सुदुःसहं नरकं महातम उपानयत् क्रमात् ॥ ८.२८॥

रुचिराश्रमाजिरचिताग्र्यतेजसा प्रियया प्रियो भुवनमान्यया समम् ।
भृशमाकुलीकृतमदप्रमादवत्सुरपारिजातहृदवाप धाम सः ॥ ८.२९॥

हरितामधीशनरदेवमण्डलं दशकं विजित्य परभीषणं मुहुः ।
स्फुरितामिह प्रियतमां निजश्रियं भगवानुपैक्षत हरन्तमप्रियम् ॥ ८.३०॥

अभिवन्दितः पवननन्दनादिभिः स कदाचिदिन्द्रसुतवर्धको गवा ।
निजराज्यमात्मदयिताय दत्तवान् हरिसूनवे हतविपक्षमुत्तमम् ॥ ८.३१॥

मुदमाप्य तत्र दयितोरुवार्तया मधुहा मरुत्सुतमुखप्रवृत्तया ।
हरितिग्मचक्रलसितोऽब्धिमध्यगं प्रययौ स पुण्यजनसेवितं पुरम् ॥ ८.३२॥

पृथुकुम्भकर्णगजराजमुद्धतं ससहोदरं सविबुधेन्द्रशात्रवम् ।
धरणीभरं पृथुलचक्रमक्षिणोन्निशितेषुचक्रकृतविक्रमः प्रभुः ॥ ८.३३॥

अथ भार्यया हुतवहं प्रविष्टया सहितः सहोदरपुरःसरैरपि ।
अयमाप्य धाम चिरमिष्टदः सतां निजमूलरूपपरमैक्यमेयिवान् ॥ ८.३४॥

---

[13] त्वरितोऽवनं

महिदासपूज्यचरणो द्विजादभूद्विदितात् स विष्णुयशसोऽमलात्मनः ।
इह यो दधे जगति पापशान्तये बहुधामहेतिमतिदीप्तगोस्थितिम् ॥ ८.३५ ॥

सुतपोरुचेरयमपापकर्दमान्ननु मानवीतनयतामुपेयिवान् ।
समयेन भूरिनिजभक्तिपूरितान् समजीजनत् सुमनसः स देवराट् ॥ ८.३६ ॥

सुबृहत्पयोधरमिथःप्रसंहतिप्रकटीभवत्परमयौवनाकृतिः ।
असुराहितां वरविलासिनीतनुः प्रददावमुष्य सुरराशये सुधाम् ॥ ८.३७ ॥

सुजनाय दत्तपद आत्मशुद्धिदः सुकुमाररूप्यभवदेष शाश्वतः ।
अनसूयया शुचिमनीषया धृतः परमादरेण मुनिपुङ्गवोढया ॥ ८.३८ ॥

दयितः सतामृषभ एष भूधरो वपुरुद्वहन् परमहंसलक्षणम् ।
व्यहरद्बलक्षतमपक्षशोभनं परतत्त्वलिप्सुसनकादिवन्दितः ॥ ८.३९ ॥

उदपादि धर्मतनयो ह्ययं हरिर्नरदेवसोदर उदारविक्रमः ।
अपि कृष्ण इत्यभिहितो मुदे सतां स्वयमेव यस्य सहजो व्यजायत ॥ ८.४० ॥

परमात्मने सततमेकरूपिणे दशरूपिणे शतसहस्ररूपिणे ।
अविकारिणे स्फुटमनन्तरूपिणे सुखचित्समस्ततनवे नमो नमः ॥ ८.४१ ॥

इति चिन्तयन्नविरलान्तरो हरिं प्रणनाम सप्रणयमादृतोऽमुना ।
अजितौ परस्परसभाजितौ स तौ निकषा निषीदति पुरोपवेशिनौ ॥ ८.४२ ॥

विविधा विधाय किल तत्र सङ्कथा वदनं मुनीन्द्रतनयस्य सुन्दरम् ।
अवलोक्य लोकपतिरानतं महासुखतीर्थमाह रहसि स्म गामिमाम् ॥ ८.४३ ॥

शृणु देवकार्यमवधार्य धैर्यवान् मदुदीर्यमाणमिदमार्यसम्मतम् ।
भविताऽन्यदुष्करतरं विधाय यत्तरुणं तवावतरणं महाफलम् ॥ ८.४४ ॥

अपिधाय सूत्रहृदयं सतां प्रियं प्रविधाय भाष्यमधुना निजेच्छया ।
अपरैः श्रुतिस्मृतिनिजार्थदूषकैः सुतरां तिरोभवति संविदाहता ॥ ८.४५ ॥

अपनेतुमेनमनयं कृतं खलैः प्रतिनेतुमात्मजनतां शुभां गतिम् ।
कुरु सूत्रभाष्यमविलम्बितं व्रजेः सुमतेन योजय कवे श्रुतिस्मृतीः ॥ ८.४६ ॥

अमितां मितामपि गिरं जगद्गुरोरिति तां निशम्य विरलेतरान्तरः ।

वदतां वरस्तमवदत् तदा तयोर्विरहाक्षमः खलु चराचरेशयोः ॥ ८.४७॥

भवतोरितः सततसेवनामृते मम मङ्क्तुमस्तु भगवन्ननुग्रहः ।
न लभेय वल्लभतमेदृशं सुखं जगतां त्रयेऽपि जगदेकमङ्गलम् ॥ ८.४८॥

कलिकालकालितगुणे धरातले सुजनो न नूनमधुनाऽस्ति योग्यधीः ।
परतत्त्ववर्णनमयोग्यतावते ननु हव्यदानमिव निन्द्यते शुने ॥ ८.४९॥

इति तं ब्रुवाणमयमब्रवीद्विभुर्भुवि सन्ति सौम्य पुरुषा गुणोचिताः ।
विमलान् मणीनिव गुणोज्झितानिमान् दयया विशोधय विशुद्धगोगणैः ॥ ८.५०॥

तव कीर्तिरार्तिमतिमात्रमानयेदशुभान् प्रभाकरविभेव कौशिकान् ।
कमलाकरानिव शुभान् प्रबोधयेत् परमाज्ञया मम विशेषतोऽनिशम् ॥ ८.५१॥

इति सा महीधरमुखाद्विनिःसृता जगतां सुखाय विशदा सरस्वती ।
द्विजराजगोविषयतातिपूरितं प्रविवेश मध्वपृथुबुद्धिवारिधिम् ॥ ८.५२॥

मतमित्यवेत्य महितं महतोरभिधाय बाढमिति धीरमतिः ।
अनयोर्नियोगमधिरोपितवान् स्वशिरस्यनन्यसुवहं[14] प्रणमन् ॥ ८.५३॥

आम्नायास्त्रय इव तत्त्वबोधकास्ते पापघ्नास्त्रय इव पावकाः प्रजानाम् ।
लोका वा सकलभृतस्त्रयोऽत्र रेजुः सानन्दा मुनिसुतधर्मसूनुमध्वाः ॥ ८.५४॥

इति श्रीमत्कविकुलतिलक त्रिविक्रमपण्डिताचार्यसुत

नारायणपण्डिताचार्यविरचिते श्रीमत्सुमध्वविजये

महाकाव्ये आनन्दाङ्के अष्टमः सर्गः

---

[14] अन्यनिवहं

नवमः सर्गः

चोदयन्तमथ गन्तुमादरात् तत्र धर्मजमजं प्रणम्य सः ।
सौख्यतीर्थकविलोकनायको वेदनायकपुरःसरो ययौ ॥ ९.१॥

आश्रमान्तरमवाप्य कृष्णतः श्राव्यमेष सकलं च शुश्रुवान् ।
चित्तवृत्तिमनुवृत्तिमान् गुरोः साध्ववेत्य गमनोन्मुखोऽभवत् ॥ ९.२॥

मन्दहासमृदुसुन्दराननं वन्दनीयमभिवन्द्य सत्पतिम् ।
प्राज्ञमौलिमणिरभ्यनुज्ञया तस्य तावदगमन्महामतिः ॥ ९.३॥

तस्य वल्लभतमाऽऽस वासभूर्मानसात् पृथुलमानसस्य नो ।
नात्यजत् क्षणमपि ह्यसाविदं नैष नाथविरही ततोऽभवत् ॥ ९.४॥

वीरदृष्टिकृतसिंहविभ्रमः शान्तदृष्टिकृतशान्तसम्मदः ।
तत्र तत्र पथि पथ्यविभ्रमः पर्वतादवततार सर्वधीः ॥ ९.५॥

वानरेन्द्र इव तीर्णवारिधिर्वासुदेव इव रत्नराजवान् ।
भीमसेन इव सूनवर्यहृन्निर्वृतिं स्वजनमानिनाय सः ॥ ९.६॥

अग्निशर्ममुखपञ्चषैर्द्विजैरन्नमाहृतमलं पृथक् समम् ।
कृत्स्नमाददयमित्यविस्मयः कृत्स्नमत्तुमलमेष हि क्षये ॥ ९.७॥

व्यासदेवहृदयातिवल्लभं वासुदेवमगणेयसद्गुणम्[15] ।
साधयत् सकलदोषवर्जितं ज्ञानभक्तिदमनन्तसौख्यदम् ॥ ९.८॥

उक्तमुक्तमभिधेयमुत्तमं वेदवाक्यमनुवादयन् मुहुः ।
व्यञ्जयत् स्मृतिवचोभिरञ्जसा तस्य चार्थमतियुक्तयुक्तिमत् ॥ ९.९॥

बालसङ्गमपि बोधयद् भृशं दुर्निरूपवचनं च पण्डितैः ।
अप्रमेयहृदयं प्रसादवत् सौम्यकान्ति च विपक्षभीषणम् ॥ ९.१०॥

अस्तदूषणमवन्ध्यभाषणं लक्षितं सकललक्षणैः समम् ।

[15] अगण्यसद्गुणम्

माननीयमपि नाकिनायकै रूपमन्यदिव धन्यमात्मनः ॥ ९.११॥

एकविंशतिकुभाष्यदूषकं ब्रह्मसूत्रगणभाष्यमद्भुतम् ।
अप्यदूष्यमतनोदनन्तधीर्भूतभाविभवदात्मभिः क्वचित् ॥ ९.१२॥

गाङ्गमङ्गलतरङ्गभङ्गदप्रान्तसुश्रिहरिवेश्मकृत्समः ।
यद्गतैकतमवर्णलेखकः सत्यतीर्थ इह भाष्यमालिखत् ॥ ९.१३॥

तत्र देवमभिवन्द्य यातवान् स्वामिनो वचनगौरवाद् द्रुतम् ।
सानुगो विविधभूरतीत्य गोदावरीतटमगादलेशधीः ॥ ९.१४॥

प्राज्ञवित्तमयमास्तुमागतैः पण्डितैर्द्विनवशाखिभिः श्रुतीः ।
प्रस्तुता अभिदधौ परीक्षकैः षट् च तत्र समयानखण्डयत् ॥ ९.१५॥

ते पृथक् पृथगमुं स्वशाखया दर्शनेन च परीक्ष्य निर्जिताः ।
सर्ववित् त्वमसि मुख्यतः कवे नास्ति ते सदृश इत्यथाब्रुवन् ॥ ९.१६॥

यस्त्रयीसकलपक्षशिक्षकस्तत्र संसदि वरिष्ठसम्मतः ।
शोभनोपपदभट्टनामकः पूर्णसङ्ख्यमनमन्मुहुर्मुदा ॥ ९.१७॥

यस्तु तार्किकशिखामणिः सुधीर्वर्तमानसमयान् निराकरोत् ।
वेदभारतपुराणनिष्ठितो भाष्यमेतदशृणोत् स मध्वतः ॥ ९.१८॥

नापरेषु रतिमाययौ क्वचिद्भाष्यमद्भुतमिदं स शुश्रुवान् ।
नारविन्दमकरन्दमाप्तवानच्छपिच्छ इव वाञ्छतीतरत् ॥ ९.१९॥

तत्र तत्र सुसभासु[16] भासुरो नन्दितीर्थसमयोक्तयुक्तिभिः ।
वादिनो विशकलय्य तान् समाक्रम्य वाचमुचितामुदाहरत् ॥ ९.२०॥

चूर्णकृद्विविधशङ्खचूर्णकश्चूर्णनाय बहुधाऽप्यशक्नुवन् ।
अत्यजद्विफलधीः प्रदक्षिणावर्तवारिजमनर्घ्यमप्यहो ॥ ९.२१॥

अप्रमेयमतिशास्त्रमीदृशं यस्त्यजत्युपनतं सुदुर्लभम् ।
तस्य तुल्यमतिरेष दुर्जनो नाथवाऽस्य सदृशोऽस्ति नीचधीः ॥ ९.२२॥

कोऽपि तं गुणविशेषविच्च विक्रीय भूरिधनमाप पूरुषः ।

[16] ससभासु

न ह्यनर्घ्यगुणमूल्यमाप्यते भाग्यदैवमिह योग्यतानुगम् ॥ ९.२३॥

व्यक्तमुन्नतिमितोऽप्ययं जनस्तस्य यन्न लभतेऽखिलं फलम् ।
स्तोकमानसतया ततो व्रजेत् तस्य हन्त पुरुषस्य तुल्यताम् ॥ ९.२४॥

क्रीतवान् नरपतिर्महादरं सादरं पुनरुदारचेष्टितः ।
अर्चयन् सततमाप सम्पदो या न ता वचनचित्तगोचराः ॥ ९.२५॥

शास्त्रकल्पकतरोरमुष्य कः प्राप्नुयात् सकलमप्यहो फलम् ।
यस्तमुत्तमगुणं विडम्बयेदित्युदीर्य स जनानरञ्जयत् ॥ ९.२६॥

नेदृशैः कविभिरेव केवलं हन्त पूज्यचरणोऽभ्यपूज्यत ।
शर्वशक्रगुरुपूर्वदैवतैरप्यलं सुसमयोद्गमोत्सवे ॥ ९.२७॥

निम्नभूरिव सतीः प्रजा व्रजन् वारिदर्तुरशनैरपूरि सः ।
प्राज्यतापहरदर्शनाम्बुना तुङ्गदेशमिव दुर्जनं तु नो ॥ ९.२८॥

कर्मभिः सकललोककौतुकैर्मानितः पथि जनैः समागतः
सन्ननाम शिवनामकीर्तनं राजतासनपुरे विराजितम् ॥ ९.२९॥

अच्युतप्रमतिरच्युतप्रियं तं दशप्रमतिमागतं तदा ।
वन्दमानमवलोक्य यां मुदं प्राप्तवांस्तदवधिर्न विद्यते ॥ ९.३०॥

प्रीतिमार्ययतिरुत्तमां पुरा प्रेषिताप्रतिमभाष्यदृग्ययौ ।
अप्यतोऽतिशयिनीं शुचिस्मितं तं विलोक्य सुचिराद्दिदृक्षितम् ॥ ९.३१॥

पूर्णदृष्टिजलधेर्गृहीतवान् भाष्यसञ्ज्ञममृतं सुखावहम् ।
चित्रमेष यतिराड् घनाघनो ग्राहयंश्च मनुजान् मुमोच नो ॥ ९.३२॥

सानुनीतिरथ नीतिमानयं भाष्यसद्गुणगणानवर्णयत् ।
शोभनाय गुरवे स्वभावतः कालतः कुमतलीनबुद्धये ॥ ९.३३॥

उक्तिभिस्तमसकृत् सुयुक्तिभिर्बोधयन् बहुलधीः प्रसङ्गतः ।
स्थेयसो भिषगिवास्य हृद्गतं मूलदोषमरुचेरचिन्तयत् ॥ ९.३४॥

दक्षपक्षविहृतेन ताडयन् भीषयन् समधिकस्वरश्रिया ।
हंसराट् कलिमलं निराकरोदेकदृष्टिमिव मानसाद् गुरोः ॥ ९.३५॥

निष्कलङ्कमिव चन्द्रमण्डलं पुण्डरीकमिव फुल्लतां गतम् ।
वारि शारदमिव प्रसादवच्चित्तमच्युतमतेर्भृशं बभौ ॥ ९.३६॥

आननन्द स हि मध्वशास्त्रमाकर्णयन् कुसमयाग्रही पुरा ।
मोहपीतलवणोदको मुहुः प्राक् पिपासुरमृतं पिबन्निव ॥ ९.३७॥

विस्तृतान्तरवियत्पदौ यती आस्यतां सुसमयप्रकाशनात् ।
तौ यथा विधुरवी अहो अहोरात्रमप्युरुतमो नृमोहकम् ॥ ९.३८॥

सज्जनान् सह महादरेण नॄन् पापिनां प्रकृतितोऽप्रियाकृति ।
दारुणाघगणदारणं स्म स ग्राहयत्यपि सुदर्शनद्वयम् ॥ ९.३९॥

नन्वनन्यशरणात्मनां सतां सिद्धिविघ्नमुखदोषभेषजम् ।
ऐच्छदच्छलदयोदयादयं रूप्यपीठपुरगः कदाचन ॥ ९.४०॥

गोपिकाप्रणयिनः श्रियः पतेराकृतिं दशमतिः शिलामयीम् ।
शिष्यकैस्त्रिचतुरैर्जलाशये शोधयन्निह ततो व्यगाहयत् ॥ ९.४१॥

स्पर्शनाद्भगवतोऽतिपावनात् सन्निधानपदतां गतां हरेः ।
त्रिंशदुद्यतनरैः सुदुर्धरां लीलयाऽनयदिमामसौ मठम् ॥ ९.४२॥

मन्दहासमृदुसुन्दराननं नन्दनन्दनमतीन्द्रियाकृतिम् ।
सुन्दरं स इह सन्न्यधापयद्वन्द्यमाकृति शुचिप्रतिष्ठया ॥ ९.४३॥

मानिनोऽपि हि वशीचकार यो दैवतप्रतिभयाऽऽत्मनः खलः ।
यायजूकगुणमात्मनः स्मरन् यो जराघटितगोत्र उच्यते ॥ ९.४४॥

आत्मनः प्रियतमक्रतोरमुं पापपूरुषमवेक्ष्य घातुकम् ।
तं निरस्य जनमप्यथाहितं सर्वभूधरसमर्थपूर्वकम् ॥ ९.४५॥

विश्वविस्मयकरः स्वतेजसा वन्द्यमानचरणः पुनर्जनैः ।
चित्रदिग्विजयकीर्त्यकीर्तिमान् मोदयन्ननुदिनं निजाः प्रजाः ॥ ९.४६॥

वासुदेवदयितो महिष्ठधीर्वासुदेवमथ साध्वयाजयत् ।
धर्मसूनुमिव धार्मिकं पुरा भीममूर्तिरयमेव भूसुरम् ॥ ९.४७॥

याज्यया समुचितानुवाक्यया सप्रवर्ग्यविभवैरभिष्टवैः ।
विश्ववेत्तुरनुजोऽत्र होतृतां प्राप्य दैवततीरतोषयत् ॥ ९.४८॥

स प्रयुज्य निशिता निशातधीर्वैश्वदेववरशस्त्रसन्ततीः ।
राक्षसासुरनिरासकृत् सुरान् वीरवर्य इव भागमापयत् ॥ ९.४९॥

वायुना त्रिरपि पूर्वपायिना सर्वदैवतजिता तरस्विना ।
योऽपरोक्षवपुषाऽप्यपेक्षितः कोऽत्र वर्णयति तं महाक्रतुम् ॥ ९.५०॥

ब्रह्मवेदननिविष्टचेतसां कर्म तत्र करणान्तरं भवेत् ।
ज्ञापयन्निति परात्मवेदकः कर्म धर्ममपि स ह्यचीकरत् ॥ ९.५१॥

यानि यानि चरितानि यानि यानीरितानि च मनोहराण्यहो ।
तानि तानि च वितानचेतसो विश्वविस्मयकराणि भान्ति हि ॥ ९.५२॥

सरस्वतीवृत्तिकरीः शरीरिणामतीत्य बह्वीः समतीतगोत्रकः ।
पुरेव कृष्णप्रियमापदश्रमं पृथुप्रबोधः पुनरुत्तमाश्रमम् ॥ ९.५३॥

सहभोगमनन्यलभ्यमस्मै हनुमद्रूपवते ददौ पुरा हि ।
अनवेक्ष्य परं स्वभीष्टकर्त्रे प्रतिदातुं हरिरैधयत् तमेव ॥ ९.५४॥

प्रणम्य गुरुमादरादथ नियोगतो योग्यतः
स तस्य जगतां हितं विदधतो गतः सानुगः ।
महिष्ठहृदयो महामहिमसिन्धुरानन्दतो
निजैरभिगतोऽनमद्रजतपीठवासं हरिम् ॥ ९.५५॥

इति श्रीमत्कविकुलतिलक त्रिविक्रमपण्डिताचार्यसुत

नारायणपण्डिताचार्यविरचिते श्रीमत्सुमध्वविजये

महाकाव्ये आनन्दाङ्के नवमः सर्गः

दशमः सर्गः

सपदि समस्कुरुत भृशं माधवगुणसाधकोऽथ मध्वरविः ।
भृगुकुलतिलकस्थानं तापकरः पापपान्थानाम् ॥ १०.१॥

दशमतिशिष्यः कश्चिच्छुभजनतायै कुतूहलनतायै ।
विविधसुवृत्तं वाक्यं काव्यमिवोचे सनायकस्तवकम् ॥ १०.२॥

भुवनाद्भुतमध्वचेष्टितं न वदेमापि सुरायुषा वयम् ।
सकलं खलु किन्तु किञ्चिदप्यथ शुश्रूषुजनाय वर्ण्यते ॥ १०.३॥

क्वचिदीश्वरदेवमेष भूपं खननं पान्थजनैर्विधापयन्तम् ।
स्वमपि प्रतिचोदयन्तमूचे क्रियया नोऽकुशलान् प्रबोधयेति ॥ १०.४॥

प्रकारं प्रकटीकर्तुमारभ्य विरराम नो ।
महीयोमतिमाहात्म्याद्वैवश्येन खनन् खलः ॥ १०.५॥

नानेनेनानेनानेनोनूनेन ननु नुन्नाः ।
नानाना नो नूनं नानेनानूननाऽनुन्नः ॥ १०.६॥

यमशेषभवप्रभवः स्मरतामसुखाब्धिरपैति न चित्रमिदम् ।
मरुतीदृशि भान्ति हि यत्स्तवने यमशेषभवप्रभवः स्म रताः ॥ १०.७॥

सञ्चरन्नञ्चनीयः कदाचिद्विभुर्विष्णुपद्यास्तटं वैष्णवाग्रेसरः ।
प्रापदाप्तैर्निजैरेष शिष्यैर्वृतस्त्यक्तविश्वस्रवं शात्रवातङ्कतः ॥ १०.८॥

इमान्स्वस्वपूर्वाश्रयानात्मवाक्यात् सलीलं दयालुः स मूलाश्रयात्मा ।
निषेद्धृननादृत्य चानन्यलङ्घ्यां तदाऽत्याययत् तां नदीं संसृतिं वा ॥ १०.९॥

वारयत वारयत वैरिसुहृदोऽमून् मारयत मारयत पारगमनात् प्राक् ।
आपतत आलपत इत्यवददुच्चैः स त्वरकराजपुरुषानुचितवाचा ॥ १०.१०॥

न जडा जले पतत साहसादहो न भयं हि वो बहुतया बहोर्जनात् ।
भवतां पतिं क्षितिपतिं दिदृक्षवः प्रतियाम केन कलहं चिकीर्षथ ॥ १०.११॥

वचसेत्यनेन स परान् न्यरुणद् भुजगान् नरेन्द्र इव मन्त्रबलात् ।
उदतारयत् परिजनं मृतिभीसरितश्च देवसरितश्च समम् ॥ १०.१२॥

निर्विकारचरितोऽपि परीतः क्रूरकिङ्करसहस्रतयेन ।
स व्रजन्नुदलसज्जगदीशः सिंहराडिव सृगालसमूहे ॥ १०.१३॥

अप्रकम्प्यवपुषं सुरासुरैः सिंहसंहननमेनमुन्नतम् ।
प्राप्तमात्मनगरान्तिकं नृपः प्रेक्ष्य सौधशिखरे स्थितोऽब्रवीत् ॥ १०.१४॥

रिपुनृपप्रणिधिप्रतिशङ्क्या पथिकपाटनकर्मणि दीक्षितैः ।
सुमुख मे परुषैः पुरुषैः कथं यमभटैरिव नासि विहिंसितः ॥ १०.१५॥

अम्लवदेवनदीतरणं ते हन्त कथं च चिकीर्षसि किं त्वम् ।
तं निगदन्तमिति प्रभृतीह स्माह महापुरुषोत्तमदासः ॥ १०.१६॥

योऽसौ देवो विश्वदीपः प्रदीप्तः कुर्मः सर्वं तत्परानुग्रहेण ।
यामस्तावत् तूर्णमाशामुदीचीमित्याद्यं तद्भाषया चित्रवाक्यम् ॥ १०.१७॥

गाम्भीर्यं धृतिमुरुवीर्यमार्यभावं तेजोऽग्र्यं गिरमपि देशकालयुक्ताम् ।
राजाऽस्य स्फुटमुपलभ्य विस्मितोऽस्मै राज्यार्धं सपदि समर्पयाम्बभूव ॥ १०.१८॥

दण्डार्हबुद्धिविषयो नृपपूरुषाणां राज्यार्हबुद्धिविषयोऽभवदित्थमेषः ।
नीतिं प्रकाशयितुमेव विपत्सु कार्यां गन्तुं प्रभुः प्रसभतोऽपि तथा व्यधात् सः ॥१०.१९॥

कदाचिच्चोराणां निकरमवलोक्याभिपतता
मवस्थाप्य स्वीयान् करगपटपिण्डार्थमतिकृत् ।
चरन्नेतेष्वेतानथ मिथ इहाघातयदहो
विभुः सम्मोह्य प्राग्विजय इव संशप्तकगणान् ॥ १०.२०॥

अन्यत्र च चोरान् धन्यप्रवरोऽसौ शूराञ्छतसङ्ख्यान् प्राप्तान् स्वजिघांसून् ।
एकेन तु शिष्येणाकृष्टकुठारान् निस्ताडितयूथ्यानद्रावयत द्राक् ॥ १०.२१॥

क्वचिच्छिलाच्छटाभ्रमादमुं ससङ्घमत्यजन् ।
अवेक्ष्य दस्यवः पुनः कुतूहलात् तमानमन् ॥ १०.२२॥

सत्योच्छेदे सेच्छायातं[17] व्याघ्राकारं दैत्यव्याघ्रम् ।
प्रालेयाद्रेः प्रान्ते प्राज्ञः प्राणेर्लीलालेशेनास्यत् ॥ १०.२३॥

प्राप स नारायणतः शुद्धशिलात्मप्रतिमाः ।
यासु स पद्मासहितो दोष्यहितः सन्निहितः ॥ १०.२४॥

पाराशर्यः परतत्त्वप्रसिद्धयै तात्पर्यार्थं परमं भारतस्य ।
व्यक्तं वक्तुं नियुनक्ति स्म साक्षादेनं धन्यं भुवने मन्यमानः ॥ १०.२५॥

तीर्थेषु तीर्थेषु च सौख्यतीर्थः क्षेत्रेषु च क्षेत्रविदां वरिष्ठः ।
गोविन्दमावन्द्य सहानुगोऽगाद्गङ्गां पुनस्तुङ्गतरङ्गमालाम् ॥ १०.२६॥

स्रवैरपेतामवलोक्य सिन्धुं सरोजबन्धुं च तदाप्तसिन्धुम् ।
तटे निषण्णानधिकं विषण्णान् निरीक्ष्य शिष्यानतरत् स एताम् ॥ १०.२७॥

न वानरेन्द्रस्य विलङ्घिताब्धेर्न वा नरेन्द्रस्य विहर्तुरस्याम् ।
इमेऽस्मरंस्तद्वपुषोऽन्यथाऽस्य शक्तस्य शङ्क्येत विपत् कथं तैः ॥ १०.२८॥

जगत्प्रदीपायितगोगणाढ्ये दिवाकरे मध्वदिवाकरे च ।
अव्यक्तरूपे श्रियमत्यजन् द्राक् सहाम्बुजैस्तन्नयनाम्बुजानि ॥ १०.२९॥

पदं पशोर्वा विनतातनूजस्तीर्त्वा नदीं तावददीनसत्वः ।
अनार्द्रवासाः सकुतूहलार्द्रैर्नृदेवभूदेवमुखैर्ववन्दे ॥ १०.३०॥

भीतैररातेरतिमात्रमत्र न तारकैरप्यथ तारकैः सः ।
स्वतेजसा विस्मितभूपनुन्नैः स्रवेन शिष्यान् निरतारयत् ताम् ॥ १०.३१॥

विशङ्कटं स्वस्तटिनीतटं ते दीपप्रदीप्तं जनताभिपूर्णम् ।
सञ्चोदयत्पण्डितमण्डलाढ्यं नाथावलोकोत्कहृदोऽभ्यपश्यन् ॥ १०.३२॥

आम्नायमाम्नायविदां विदग्धं सभावभेदं प्रवदन्तमत्र ।
दैव्यां सभायामिव पद्मयोनिं प्रैक्षन्त साक्षात् सुखतीर्थमेते ॥ १०.३३॥

प्राप्तस्ततो हस्तिनराजधानीं मासानुवासेह स वासयोग्यान् ।
मठान्तरेऽनन्तगुणान्तरः सन्नेकान्तदेशे सरितोऽसमीपे ॥ १०.३४॥

---

[17] स्वेच्छायातं, सेच्छापातं

भित्वा भुवं देवनदी जगाम शाखाविशेषेण निषेवितुं तम् ।
वाणी च यत्प्रेष्यतया कृतार्था शिवादिवन्द्या न तदत्र चित्रम् ॥ १०.३५ ॥

गुरुप्रबर्हस्य पदारविन्दं विदूरतः सा प्रणनाम मूर्ता ।
औदार्यसौन्दर्यतनुं तनुं तामालक्ष्य शिष्यैरतिविस्मितं तैः ॥ १०.३६ ॥

तेनोपयातेन कदाचनाथ वाराणशीं पापनिवारणेन ।
अवादि वाणी बलिनः स्वशिष्यान् विलोक्य लीलावसरेऽवलिप्तान् ॥ १०.३७ ॥

नियुद्धसिद्धयै युगपद्धि वीरंमन्या भवन्तोऽभिपतन्तु मां द्राक् ।
समस्तशक्तिं न युनक्ति यः स्वामत्रास्मदाज्ञां स निराकरोति ॥ १०.३८ ॥

इतीरयन् पञ्चदशैष यूनः प्राप्तान् प्रयुद्धान् युगपन्निपात्य ।
उत्थीयतां यस्य समर्थता स्यादिति ब्रुवाणोशनकैर्जहास[18] ॥ १०.३९ ॥

सौमेरवं गौरवमावहन्ति तवाङ्गमङ्गाङ्गुलयश्च नोऽङ्ग ।
पुरा विनश्याम इतो दयालो स्वामिन् विमुञ्चेत्यवदंस्तदा ते ॥ १०.४० ॥

तेनाथ मुक्तैरतिविस्मयस्तैरवाप्यनालोच्य हि तत्स्वरूपम् ।
यद्भ्रूविजृम्भेण सशम्भुशक्रं[19] जगत् समस्तं नियतं निकामम् ॥ १०.४१ ॥

सदाक्ष्यमाक्षिप्तसमस्तपक्षको यतिः प्रभुं कोऽप्यमरावतीपदः ।
जिगीषया ज्ञानसहायकर्मणः प्रसाध्यतां साधनतेत्युदाहरत् ॥ १०.४२ ॥

संसाधितार्थे भगवत्ययुक्तिवित् पप्रच्छ स ज्ञानपदार्थमुग्रधीः ।
ज्ञातः स ते ज्ञान्यसि चेन्न चेन्न स प्रश्नो घटेतेति निराकृतैष तम् ॥ १०.४३ ॥

विततततमतमोऽन्तं साधयन्त्या नितान्तं
सदसि सदसि रेजे व्याख्यया व्यासशिष्यः ।
सकलसमयिहस्ताम्भोजबन्धाभिनन्दी ।
शरदि शरदि चन्द्रश्चन्द्रिकासम्पदेव ॥ १०.४४ ॥

जननं समये समये जगतः प्रथिते समयेसमयेदमिते ।
सनिरासमयेऽसमये स्थितियुक्स्ववभासमयेऽसमयेष्टधिया ॥ १०.४५ ॥

---

[18] ब्रुवाणोऽशनकैर्जहास
[19] सशर्वशक्रम्

वर्तस्वाध्यधि सर्वं दीव्येदं सोऽनिशं स्वतन्त्रो विष्णुः ।
उज्जासय दुष्टानां संस्कुरु साधून् गुणाभिपूर्णोऽप्यगुणः ॥ १०.४६॥

असमोत्तमो मतोऽसौ श्रियः पतिर्विश्वतोविभिन्नात्मा ।
परमान् प्रकाममर्थान् प्रकाशयामास सेत्यादीन् ॥ १०.४७॥

समानया यानमास मायया ततयायमा ।
नयासना नासयान यातनाललनातया ॥ १०.४८॥

प्राज्ञो राज्ञां त्रिदिवपदवीं कौरवं क्षेत्रमाप्तः
सस्माराथ स्वविहृतिपतद्धस्तियुद्धोत्सवानाम् ।
सत्यात्माद्यैरिह परिवृतो भाविमारीचदृग्भिः
विस्मेरैः स्वैर्निजनृपतनूहेतिदृष्ट्याऽतितुष्टैः ॥ १०.४९॥

विप्रात्मेशः क्षणार्धं कृतनतिरशितिश्रीर्हृषीकेशदेशे
स्पष्टं दृष्टोऽप्यदृष्टः सपदि विहितवान् विस्मयं देहभाजाम् ।
स्वप्ने स्वप्रेरितान्यस्थलगनिजनरोपाहृतैर्भक्ष्यभोज्यैः
प्राज्यैः प्राभोजयत् स्वं गुरुमखिलगुरुं वेदयन् वेदबन्धुम् ॥ १०.५०॥

अवाप्तवान् पुनरिषुपातमस्मरद्रमापतिं स परशुराममादरात् ।
स राजकेल्युरुकदलीसहस्रकं तदाददभ्यवहृतिदत्तमुत्तमम् ॥ १०.५१॥

स शङ्करपदद्विजोपहृतमाप्य गोवाख्यगां
गरिष्ठकदलीलसदृशशतीचतुष्कं चरन् ।
पयःकलशपञ्चकत्रिकयुगाभिपूर्णं पपा-
वदृष्टगतिरप्यभून्नृपनृमण्डलैरुद्यतैः ॥ १०.५२॥

अयमेव गोविषयतोऽपि कुत्रचित् सदसि जनतार्थितो जवात् ।
पुष्पमुत फलमहो विदधे जनसुप्तिदानुपमगानसम्पदा ॥ १०.५३॥

धन्योऽमह्यत नाकिनामहितहृद्घ्राणः समोऽजस्य यो
मध्वो ध्वस्तदुरागमोऽग्र्यहिमगुश्रीः काममायामहृत्[20] ।
विष्णुं विश्वजयप्रदं स हि नमन् सेव्यं सुसौख्यं मुदा
दाक्ष्याच्छ्रीधरमामयादिविरही योगी सुहृत् सर्वदा ॥ १०.५४॥

इति भुवनविभूषणस्य भूयांस्यविगणितानि कृतान्तराणि हन्त ।

[20] काममायामिहृत्

श्रवणमननकीर्तनैरभीष्टं प्रतिददतीत्यमराः प्रकीर्तयन्ति ॥ १०.५५ ॥

इति विविधगोधारावारैर्विशारदवारिदो
हरिपदरतो विद्याविद्युत्प्रदीपितदिङ्मुखः ।
भवभयमहाघर्मोत्तप्तं सदङ्घ्रिपमण्डलं
सफलसुमनः सान्द्रानन्दं व्यधादविपल्लवम् ॥ १०.५६ ॥

इति श्रीमत्कविकुलतिलक त्रिविक्रमपण्डिताचार्यसुत

नारायणपण्डिताचार्यविरचिते श्रीमत्सुमध्वविजये

महाकाव्ये आनन्दाङ्के दशमः सर्गः

एकादशः सर्गः

प्रचुरान्तरप्रवचनं फणिराडुपशुश्रुवान् ससनकादिमुनिः ।
गगनेऽल्पदृष्टवपुरत्र जनैस्त्वरितं निलीनरुचिराप पदम् ॥ ११.१॥

अतिचित्रधाम्नि निजधाम्नि रतं ससहस्रमस्तकमनन्तममुम् ।
मुनयोऽभिवाद्य विनयाभरणाः वरमन्वयुङ्क्त तदर्थमिमम् ॥ ११.२॥

भगवत्तमस्य विपुलप्रमतेः समयं मनोहरतमं जगति ।
महितं भवद्भिरपि लोकपते पठतां मुहुः फलमुदेष्यति किम् ॥ ११.३॥

अधिकारिणां फलमलं विदुषां भवति प्रवृत्तिरतिवीर्यवती ।
इति तत्फलं सफलसङ्कथनो भगवान् प्रपञ्चयतु भूरिदयः ॥ ११.४॥

इति तैरुदीरितमुदारमतिर्वचनं निशम्य स जगाद गिरम् ।
शृणुतादरेण महनीयतमं महनीयपादसमयस्य फलम् ॥ ११.५॥

त्रिदिवादिलभ्यमपि नास्य फलं कथितं कृषेरिव पलालकुलम् ।
स्वफलं तु मुक्तिपदमुक्तिपदं शुकशारदादिपरमार्थविदाम् ॥ ११.६॥

परमागमार्थवरशास्त्रमिदं भजताममानवकलारचितम् ।
व्रजतामहो परमवैष्णवतां रतये स्वलोकमजितो दिशति ॥ ११.७॥

ननु तत्र विश्वविभवैकपदं परिभाति[21] पूर्णपुरुषस्य पुरी ।
उपलभ्यते यदुपमानपदं प्रतिबिम्बमेव मणिवप्रगतम् ॥ ११.८॥

सितसौधसन्ततिरुचा स्फुरिता परितोऽरुणाश्मगृहपङ्क्तिरुचिः ।
इह मच्छरीरवलये लसितामनुयाति मूर्तिमसुरासुहृतः[22] ॥ ११.९॥

शबलावलीकघठितस्फटिकद्युतिभिर्हरिन्मणिमयी वलिभी ।
प्रतिसद्म भाति यमुना मिलिता सितसौरसैन्धवपयोभिरिव ॥ ११.१०॥

---

[21] प्रतिभाति
[22] सुहृदः

यदि नाभविष्यदिह विभ्रमतानियमो जनस्य निलयावलिषु ।
विकटा विटङ्ककृतपत्रिततिः कृतकेत्यवैक्ष्यत कथञ्चन नो ॥ ११.११॥

विविधस्तुलोपगतचित्रपटीसुवितानलम्बिमणिदामगणः ।
शरणान्तरेष्वधिकपूरणतः प्रचकास्ति विभ्रम इवावगलन् ॥ ११.१२॥

विमलाकृतिः प्रकृतिरेव महामणिहेममय्यखिलवस्तुमयी ।
इह सम्भवेत् सकलकान्तिरसः कथितोऽधिकोक्तिभिरतः कविभिः ॥ ११.१३॥

तदनादिकालमितमुक्तिरतेरगणय्य[23] शम्भुमुखसङ्गततेः ।
नगरैर्महापुरमसंहृतिमल्लसति प्रभोरयमहो महिमा ॥ ११.१४॥

भवनं विभाति भुवनैकपतेर्भुवनत्रयाद्भुतगुणातिशयि[24] ।
वरमन्दिरप्रकरमध्यगतं द्विजमण्डलस्थशशिमण्डलवत् ॥ ११.१५॥

स्वयमिन्दिरैव पतिमानकरी गृहकर्म यत्र कुरुते सुतराम् ।
अपि किङ्करीदशशतीमहिता श्रियमत्र वर्णयति वेश्मनि कः ॥ ११.१६॥

कमलापतिः कमलयाऽमलया कमनीयया कमललोचनया ।
अमृताहिराजमृदुभोगगतः स्वरतोऽपि तत्र रमते परमः ॥ ११.१७॥

तरुणप्रभाकरसहस्ररुचं कनकाम्बरं मणिमयाभरणम् ।
हसिताननेन्दुमरविन्ददृशं तमरीन्द्रधारिणमनुस्मरत ॥ ११.१८॥

गणयेद्रमाऽस्य न गुणानखिलांश्चतुराननश्चतुरवागपि नो ।
न वयं सहस्रवदना अपि तानपरोदितानतिवदेम पुनः ॥ ११.१९॥

विधयो विहङ्गपतयोऽगणिता रमणीयुताश्च फणिपेन्द्रमुखाः ।
परयोगभूरिसुखभोगमिता अवलोक्य तं दधति मोदरसम् ॥ ११.२०॥

सचतुर्भुजा वनजपत्रदृशो वरवेषिणोऽत्र सपिशङ्गपटाः ।
अरुणप्रभाश्च तरुणाभ्ररुचो विचरन्ति नाथरुचयः पुरुषाः ॥ ११.२१॥

भगवत्समीपमुपयातवतां प्रमदो न केवलमलब्धतुलः ।
अपि तस्य लोकमतिलोकगुणं भजतां सुदुर्लभमभूरिशुभैः ॥ ११.२२॥

[23] अगणेय
[24] गणातिशयि

न भवन्ति यत्र मृतिजन्मजरास्त्रिविधं भयं किमुत दुःखगणः ।
अपरं च किञ्चिदशुभं न भवेन्न गुणादि तत्प्रभवमूलमपि ॥ ११.२३॥

अनुभूयते सुखमनन्तसखैः सकलैरलम्मतिपदं सततम् ।
अपि तारतम्यसहितैः स्वगुरुप्रवणैः परस्परमुरुप्रणयैः ॥ ११.२४॥

अतिसुन्दराः सुरभयः पुरुषा हरिचन्दनेन नवचन्द्ररुचा ।
चलचारुचामरधरानुचरा विचरन्ति नित्यतरुणा इह ते ॥ ११.२५॥

सविलासलास्यपरितुष्टदृशो मृदुगीतवाद्यमुदितश्रवणाः ।
अनुरञ्जयन्ति नवकञ्जदृशो रमणा अमी स्वरमणीस्तरुणीः ॥ ११.२६॥

परिणायकानुपवनाभिमुखा ननु निःसरन्ति हरिणीनयनाः ।
विमलाद्विमानवलयाच्छनकैः शशिमण्डलादिव रुचो रुचिराः ॥ ११.२७॥

अरुणाश्मवर्णतनवस्तनवः शुभहारसन्निभरुचोऽत्र पराः ।
हरिनीलनीलरुचयोऽप्यपराः प्रकटीभवन्ति विविधाभरणाः ॥ ११.२८॥

सुचिरद्युतीर्दधति सूक्ष्मतरं स्वयमम्बरं च खलु बिभ्रति याः ।
शुकनिस्स्वना ध्रुवमिमा अपराः सुपयोधरा जलधरावलयः ॥ ११.२९॥

समतीतविद्रुमभुवां सुदृशां पदपल्लवाग्र्यनखरक्तरुचीः ।
परभागतः स्फटिककुट्टिमभूः प्रकटीकरोति न पुरा प्रकटाः ॥ ११.३०॥

हरिणीदृशां सुवसनानि बृहत्सुनितम्बबिम्बरुचिरोरुरुचा ।
शबलद्युतीनि मदनस्य जगज्जयवैजयन्त्य इति निश्चिनुमः ॥ ११.३१॥

करपल्लवैस्तरलितैर्ललितैरसकृत्क्वणत्कनककङ्कणकैः ।
नवरोमराजिवलिवल्गुमृदुप्रतनूदरैरतिमनाक्तरलैः ॥ ११.३२॥

कुचकुम्भपूर्णतरकान्तिसुधारसशेषबिन्दुविसरच्छविभिः ।
वरहारराजिभिरुतानुपदं प्रतिलोडिताभिरशनैरुरसि[25] ॥ ११.३३॥

अपि लीलया कुवलयोल्लसितैरपरैः करैः सहचरीनिहितैः ।
वदनैः शुचिस्मितकटाक्षरसैश्चलकुण्डलोल्लसितगण्डयुगैः ॥ ११.३४॥

[25] प्रतिलोठिताभि

प्रगतासु तासु रणितैरशनामणिनूपुरैरिव पुरा[26] गदिताः ।
अनुवीक्षितुं तनुविलासमिमं तरुणा भवन्त्यथ निवृत्तमुखाः ॥ ११.३५ ॥

अनुपालिताः स्वदयितैर्दयिताः कथमप्युपेत्य कुचभारनताः ।
शनकैः पुनस्तदवलम्बबलात् किल ता विशन्ति परमोपवनम् ॥ ११.३६ ॥

हसितप्रसूननिकरोरुभरप्रणमत्सुवर्णमणिसर्वतरून् ।
उपगूहयन्नमृतसिन्धुसखः पवनो न कस्य सुखमेधयति ॥ ११.३७ ॥

उपचारनन्दनमिदं द्युवनं नियमेन नन्दयति यन्न जनम् ।
परमेव नन्दनमुपेन्द्रवनं सकलं सदा यदभिनन्दयति ॥ ११.३८ ॥

वरपारिभद्रकसुकल्पतरुव्रजपारिजातहरिचन्दनवत् ।
सहितं समादिपदताननगैः परिभूषयन्ति तदहो ऋतवः ॥ ११.३९ ॥

स्मितमाधवीकुसुमरम्यतरौ नवचम्पकादिकुसुमोल्लसितौ ।
मधुमाधवौ मधुपगीर्मधुरौ मधुजित्प्रियान् प्रमदमानयतः ॥ ११.४० ॥

नवमल्लिकास्रजमभीष्टतमः शुचिसम्भवां प्रणयिनीशिरसि ।
कलयन् स्वयं न कुशलेति किल प्रतिघट्टयत्युरुकुचावुरसा ॥ ११.४१ ॥

मधुरस्वरास्ततपतत्रततिप्रकटान्तपङ्क्तिधृतनेत्ररुचः ।
शिखिनोऽनुयान्ति हि सहस्रदृशं जलदर्तुलक्ष्म निजनृत्तमहे ॥ ११.४२ ॥

शरदोल्लसत्कुवलयेक्षणया विकचारविन्दरुचिराननया ।
प्रियया च शोभनशुकस्वरया[27] रमते जनो मुखरहंसकया ॥ ११.४३ ॥

अभिनन्दयन् हिमऋतुं सुसखा स्फटिकाचलच्छलहिमाधिकृतम् ।
फलिनीकुलं कुसुमयञ्छिशिरो हसतीव फुल्लनवकुन्दरुचा ॥ ११.४४ ॥

हिमशीतवर्षपरितापपुरस्सरदोषमूलमिह नर्तुगुणः ।
प्रियमेव साधयति नित्यमहो स विमुक्तिमानिति विमुक्तिमताम् ॥ ११.४५ ॥

अमृतस्रगुत्तमफलप्रसवानमृताय तत्र जनताऽर्पयति ।

[26] तदा
[27] स्वनया

उपभोक्तुमप्यविधिबन्धवशा प्रकृतिं प्रयाति सकलोऽपि सदा ॥ ११.४६ ॥

प्रमदातिरेकमुपयातवता प्रमदागणेन चरतोपवने ।
उपगीयते स्म मधुरं मधुजिच्चरितं सकान्ततितिना सततम् ॥ ११.४७ ॥

ललना ललन्त्यभिवरं प्रवरा ललिता लुनन्ति कुसुमानि पराः ।
इतराः स्रजो विरचयन्ति पतीननुरञ्जयन्ति न हि[28] काञ्चन नो ॥ ११.४८ ॥

वनलीलया विविधया मुदितास्तरुणा घनस्तननतास्तरुणीः ।
सुलतालयेषु परिरभ्य रतिं वदनारविन्दमधुपा दधति ॥ ११.४९ ॥

रसिकाः सुधाप्सु सरसीषु ततो रुतनूपुरानुकृतसारसकाः ।
विहरन्ति साकमवगाह्य धवैर्जलमड्डुकोत्सवहसद्वदनाः ॥ ११.५० ॥

विविधा विधाय विहृतीः सलिले विकटेषु विद्रुमतटेषु गताः ।
सुरभिं सुवर्णमथ वर्णकमाददते सखीकरगतं महिलाः ॥ ११.५१ ॥

जघनांशुकैरवयवाभरणैः कुचकुङ्कुमैश्च कचमाल्यवरैः ।
नयनाञ्जनैरपि मिथोऽब्जदृशां घटितैरलङ्कृतिरलं क्रियते ॥ ११.५२ ॥

तनुमध्यमा निजगृहाणि गताः सममात्मनामसुसमैरसमैः ।
अमृतं पिबन्त्यसुलभं भविभिश्चषकैर्महारजतरत्नमयैः ॥ ११.५३ ॥

मृदुकम्रशय्यमनुरागवतां मणिमञ्चमञ्चितदृशोऽवसरे ।
अपिचोदिता[29] अधिरुहन्ति शनैर्विनयो हि भूषयति सर्वरसम् ॥ ११.५४ ॥

अभिकान्तमुन्नमितकान्तकुचा किल बध्नती सकुसुमां कबरीम् ।
सुमुखी सुलक्ष्यभुजमूलवलिः परिरभ्यते प्रणयिनाऽतिरसात् ॥ ११.५५ ॥

पृथुवृत्ततुङ्गकठिनोरसिजद्वयवारितायतनिजान्तरयोः ।
भुजयोर्युगेन रमणो रमणीं परिरभ्य कोऽत्र सुखयेन्न[30] सुखी ॥ ११.५६ ॥

स्मितफुल्लमुल्लसितझि[31]ल्लिलसन्मणिकुण्डलं मृदुकटाक्षपटु ।

[28] तु
[29] पतिचोदिता
[30] रमयेन्न
[31] लसितचि

निभृतो निरीक्ष्य सुचिरं सुतनोः प्रतिचुम्बति प्रियतमो वदनम् ॥ ११.५७॥

नतमुन्नमय्य मुखचन्द्रमसं परिरम्भसम्भृतमुदा सुदृशः ।
उपरम्यते न तरुणेन चिरं मधुराधरामृतरसं पिबता ॥ ११.५८॥

सुरतोत्सवोत्सुकतया त्वरयन् करपल्लवं निवसनग्रहणे ।
कररुद्धमायतदृशः सहसा त्वरयत्यथ द्विगुणमिष्टतमः ॥ ११.५९॥

रभसावपातितपृथूरसिजः परिरभ्य तत्क्षणवियाततरः ।
मणितादिसौरतवितानपटू रमयत्यमून् युवतिसङ्ग उत ॥ ११.६०॥

अतिलौकिकान् रमयतो रमणान् रमयन्त्यलौकिकगुणा ललनाः ।
अनुरूपरूपमतिलोकसुखं तदलौकिकं निधुवनं लसति ॥ ११.६१॥

न रतिः श्रमादिखचिता नियमाद्विरहव्यथाऽपि न वधूवरयोः ।
प्रतिकामिनीप्रणयतः कलहो न समस्तदोषरहिते हि पदे ॥ ११.६२॥

सुखसंविदात्मकतया वपुषां सुरभित्वमेव बहिरन्तरपि ।
हरिधाम्नि दम्पतिगणस्य ततो ननु मान्यतेऽपि मुनिभिः सुरतम् ॥ ११.६३॥

शृणुताप्यलोकविषयं विषयं सकलस्य मुक्तनिकरस्य दृशाम् ।
वपुरिन्दिरापतिरमन्दरसं ननु सुन्दरं प्रकटयत्यनिशम् ॥ ११.६४॥

मणिराजिराजित[32] महामुकुटं शितिकान्तकुन्तलसहस्रतयम् ।
अलिकार्धचन्द्रविलसत्तिलकं श्रवणोल्लसन्मकरकुण्डलयुक् ॥ ११.६५॥

परिपूर्णचन्द्रपरिहासिमुखं जलजायताक्षमरुणोष्ठपुटम् ।
हसितावलोकललितैरतुलैरभिनन्दयत्प्रणतमात्मजनम् ॥ ११.६६॥

नवकम्बुकण्ठमहिमांशुमहो महिमोपलेन्द्रवरहारधरम् ।
रमणीयरत्नगणविद्धलसद्वलयाङ्गुलीयकवराङ्गदवत् ॥ ११.६७॥

रविचक्ररुक्प्रकरचक्रकरं विधुबिम्बकम्बुमधुराम्बुरुहम् ।
ज्वलनज्वलद्गदमुदारधनुः पृथुवृत्तहस्तमतिताम्रतलम् ॥ ११.६८॥

वरपीवरांसमधिराजदुरोमणिमण्टपाग्र्यविलसत्कमलम् ।

[32] मणिराजराजित

सजगद्विसप्तकतनूदरकं शुभनाभिकञ्जगतकालिनुतम् ॥ ११.६९ ॥

अतिकान्तकाञ्चिपदकान्ति[33] मिलत्तपनीयभङ्गरुचिपिङ्गपटम् ।
वरहस्तिहस्तसदृशोरुयुगं क्रमवृत्तचारुतरजङ्घमुत ॥ ११.७० ॥

वरनूपुरं परमरुक्प्रपदं नवविद्रुमद्युतिनखाङ्गुलिमत् ।
अरिवारिजध्वजकलङ्कलसत्पदपांसुपावितजगत्त्रितयम् ॥ ११.७१ ॥

निखिलागमावगमितैरमितैः सुखसंविदादिभिरनन्तगुणैः ।
प्रपदादिकान्तसकलावयवाकृतिभिः सदैक्यवददोषलवम् ॥ ११.७२ ॥

अधिकारिणां गुणविशेषवशात् द्विपदाद्यनन्तचरणान्ततया ।
अतिभासितं घनगुणापघनैरितरैश्च तत्तदुचितै रुचिरैः ॥ ११.७३ ॥

नवभानुभाः कनककान्तिपरं वरहारहारिहरिनीलहरित् ।
शबलप्रभादिविविधद्युतिमत्सुखबोधसौरभसुरूपगुणम् ॥ ११.७४ ॥

आश्चर्यरत्नेष्वधिकं जगत्त्रयेऽप्याश्चर्यमाश्चर्यमहो मुहुर्मुहुः ।
सौन्दर्यसारैकरसं रमापते रूपं सदानन्दयतीह[34] मोक्षिणः ॥ ११.७५ ॥

इज्यते यज्ञशीलैः स यज्ञः प्राज्ञमध्ये परः प्रोच्यतेन्यैः[35] ।
गीयते गेयकीर्तिः सुगीतैर्विध्यबद्धैः सदाऽऽनन्दसान्द्रैः ॥ ११.७६ ॥

वैकुण्ठे ते श्रीविशेषा जनानामत्याश्चर्यं चित्तवाचामभूमिः ।
वैकुण्ठेते श्रिविशेषाजनानामुक्तश्चाध्ये युक्तमेतादृशत्वम् ॥ ११.७७ ॥

यं यं सुखी कामयतेऽर्थमत्र सङ्कल्पमात्रात् सकलोऽपि स स्यात्[36] ।
इत्येव वेदा अपि वेदयन्ति मुक्तिं ततः को विभवातिरेकः ॥ ११.७८ ॥

---

[33] पदकाञ्चि
[34] समानन्दयतीह
[35] प्रोच्यतेऽन्यैः
[36] सकलः स स स्यात्

महानन्दतीर्थस्य ये भाष्यभावं मनोवाग्भिरावर्तयन्ते स्वशक्तया ।
सुराद्या नरान्ता मुकुन्दप्रसादादिमं मोक्षमेते भजन्ते सदेति ॥ ११.७९ ॥

इति श्रीमत्कविकुलतिलक त्रिविक्रमपण्डिताचार्यसुत

नारायणपण्डिताचार्यविरचिते श्रीमत्सुमध्वविजये

महाकाव्ये आनन्दाङ्के एकादशः सर्गः

द्वादशः सर्गः

तत्रानन्तस्वान्तवेदान्तिसिंहे मुख्यव्याख्यानिस्वने जृम्भमाणे ।
सद्यो माद्यद्वादिदन्तीन्द्रभीमे भेजे क्षोभो मायिगोमायुयूथैः ॥ १२.१॥

सम्भूयामी चोलजद्वीपिपुर्योः पार्श्वे पापा मन्त्रयामासुरुग्राः ।
सासूया भूभूषणे वायुदेवे मूढा यद्वद्धार्तराष्ट्रान्तिके प्राक् ॥ १२.२॥

सन्मात्सर्यं बद्धुमूचेऽशुभानां वाचालोलं कोपि गां धारकस्य ।
मध्ये तेषां नीचनीत्या समानो वाचालोऽलं कोऽपि गान्धारकस्य ॥ १२.३॥

एकं तत्वं वष्टि मायामयीयं वाक्यैः प्राच्यैरप्यवाच्यं विधत्ते ।
पूर्वाऽपूर्वा हन्त दौर्घद्यभूषा चित्रं चित्रं दर्शनाचार्यनीतिः ॥ १२.४॥

मर्त्यामर्त्यामर्त्यविद्विट्पुरोगं विश्वं दृश्यं विप्रचण्डालपूर्वम् ।
भेदापेतं भेदिमानैः समानैः साधीयः कः साधयेत् तामलब्ध्वा ॥ १२.५॥

सत्यं सत्यं व्यावहार्यं विधत्ते सर्वं मोहे सर्वनिर्वाहिणी सा ।
ज्ञाने जाते दग्धवस्त्रप्रतीतं पक्के तस्मिन्स्तप्तलोहाप्तवार्वत् ॥ १२.६॥

ज्ञानिश्रेष्ठश्रेष्ठविज्ञानिवर्गे नैर्गुण्यस्थे साम्प्रतं नाथभूताः ।
आक्रन्दं मे हन्त शृण्वन्तु सोऽयं हा हा मायावाद उत्सादमेति ॥ १२.७॥

भ्रष्टा भाट्टा न प्रभाकृत्प्रभाभूत् त्रस्ता माहायानिकाद्याश्च यत्र ।
दुर्गं मायावादसत्रं दिधक्षुर्नोपेक्ष्या नस्तत्त्ववादाग्निजिह्वा ॥ १२.८॥

यं यं प्रापद् भूरिचित्तः प्रदेशं तस्मात् तस्मादागतेरन्तरायः ।
प्रत्यज्ञायि व्यक्तमार्येण सोऽपि प्राप्नोत् पार्श्वं हा वयं भाग्यहीनाः ॥ १२.९॥

प्रश्नः पृष्टः[37] खण्ड्यते तेन नूनं युक्तां युक्तिं वक्ति चासावखण्ड्याम् ।
वादिव्रातं लज्जयेन्नो विशेषादाक्षेसेति श्रूयते किं नु कुर्मः ॥ १२.१०॥

प्राच्यं शास्त्रं यत् सपादं तु लक्षं वाक्येनैकेनाक्षिपद्धर्षतीर्थः ।

[37] प्रष्टुः

इत्थं पान्थैर्वर्णितं शृण्वतः प्राग्युष्मान् प्रापद्दूयमानं मनो मे ॥ १२.११॥

वेदव्यासो न्वेष वेदो नु मूर्तो दिव्या मूर्तिर्यस्य सा सुस्मितस्य ।
तद्द्रष्टॄणां चेति वाणी कृपाणी नूनं मायापक्षमूलं छिनत्ति ॥ १२.१२॥

अक्लिष्टं तत्सूत्रभाष्यं बलीयो मानोपेतं का क्षतिर्नस्तथा चेत् ।
आस्माकाः केऽप्येवमुक्त्वा विलज्जा लज्जासिन्धौ दुःसहेऽमज्जयन्नः ॥ १२.१३॥

तस्य व्याप्तैः शिष्यजालैस्तु गौणैः संसत्सिन्धौ शङ्खचक्रादिभृद्भिः ।
मा गृह्येरन् विश्वसत्त्वान्तराणि क्षेमास्यै नस्तत्र नीतिं विधत्त ॥ १२.१४॥

गौणैस्तर्कैर्गौणवाक्याभिगुप्तैर्गौणीं बुद्धिं वर्धयन्ते नृणां ते ।
हंसानां नो वाग्विघातप्रवीणाः सिन्धुं भूयो वारिवर्षैरिवाब्दाः ॥ १२.१५॥

बाहुल्येन ह्येतदुक्त्वा खलु द्रागेते विश्वं व्याप्नुवन्ति प्रकामम् ।
अस्मिन्नस्मद्दर्शनापायकाले यद्वल्लोकापायकाले लयापः ॥ १२.१६॥

आकर्ण्येत्थं तस्य वाणीमथान्यो मानी तेषां मानिनां चित्तवेत्ता ।
स्वानां चेतो नन्दयन् मन्दचेता धृष्टामुच्चैर्वाचमाचष्ट कष्टः ॥ १२.१७॥

तेजःशङ्कामात्रतो यद्विलीनं धिग्भीरूणां मानसं मानहीनम् ।
एकान्तेन प्राप्ततेजोविलीनं स्थेयो यस्माद्भाति हैयङ्गवीनम् ॥ १२.१८॥

येषां विद्यां साङ्करी शङ्करी नो देवादीनां बाध्यतां साधयन्ती ।
शौक्रीवालं लज्जयेद्देवपूज्यं तेषामेषां सन्निधौ को विषादः ॥ १२.१९॥

यद्यद्वैतं कर्कशैर्गौणतर्कै रुद्धं साध्यं नैव भात्यस्तु तावत् ।
षट्कर्मज्ञैर्दिव्यमन्त्रौषधाढ्यैरेतैर्गुप्तान् नो न जेता हि कोऽपि ॥ १२.२०॥

यद्यप्येवं न ह्युपेक्ष्यो विपक्षः किन्तु प्राप्तो नाधुनाऽऽक्रन्दकालः ।
अप्यद्वन्द्वस्वात्मबोधप्रतीतैराचार्यैर्यच्छङ्क्यते शङ्करादैः ॥ १२.२१॥

पारम्पर्येणागतं तत्त्वशास्त्रं हन्तोत्सन्नं नूतनेनेत्युदीर्य ।
तेषां दोषा वर्णनीया विदग्धैः सन्तोऽसन्तो वाऽपि मध्यस्थलोके ॥ १२.२२॥

स्वाभिप्रायो ब्रह्मवत् स्यादवाच्यो मायाशक्त्या सर्वनिर्वाहसिद्धिः ।
इत्थं नीत्या शास्त्रनीत्येव बाध्यः सर्वो लोकः स्वात्मनो यः परः स्यात् ॥ १२.२३॥

ग्रामे ग्रामे वार्यतां माननैषां पूर्वं पूर्वं सामपूर्वैरुपायैः ।
सम्प्राप्तानां मानभङ्गाय कार्यं ग्रन्थाकर्षाद्युद्यतैरस्मदीयैः ॥ १२.२४ ॥

इत्याद्येते कार्यमालोच्य काले चक्रुर्वक्राश्चक्रिभक्तप्रतीपम् ।
योग्या मङ्क्तुं तेऽन्यथा स्युः कथं वा दुःखोग्राम्भस्यन्धतामिस्रसिन्धौ ॥ १२.२५ ॥

व्रत्याकारं वासुदेवद्विषं तं प्राज्ञंमन्यं पुण्डरीकाभिधानम् ।
वादव्याजात् क्षेपकामाः कुमन्त्राच्चक्रुर्यत्नं रूप्यपीठालयेऽमी ॥ १२.२६ ॥

यद्वत् सिंहं ग्रामसिंहोऽशुचीच्छो हंसं[38] काको यद्वदेवैकदृष्टिः ।
यद्वन्मायी भूरिमायुस्तरक्षुं तद्वद्विद्वद्वर्यमाह्वास्त मूढः ॥ १२.२७ ॥

अप्यल्पोऽसौ नह्युपेक्षाम्बभूवे लोलात्मेवादक्षपक्षः पतङ्गः ।
मध्वेनाहो दुस्तरेण स्वभावात् तेजोराशी[39] राजितेनाग्निनेव ॥ १२.२८ ॥

मानैर्मान्यैर्भासमानोऽसमानैराक्षिप्यैनं स्वं मतं साधयित्वा ।
प्रीत्यैर्विष्णोरुत्तमप्रीतितीर्थो वेदव्याख्यां वेदवेदी चकार ॥ १२.२९ ॥

आम्नायं ये पेठुराम्नायपूर्वं प्राप्ता विप्रास्तत्र कौतूहलेन ।
पर्यासीनास्तावदाचार्यवर्यं प्रेक्ष्यं प्रेक्षाञ्चक्रिरेऽनेकसङ्ख्याः ॥ १२.३० ॥

उक्तांङ्गेभ्यः कादिकान् व्यञ्जयन्तं तत्तन्मात्राव्यञ्जनादौ प्रवीणम् ।
तिस्रोऽवस्थास्तद्गुणैर्भावयन्तं देवा दृष्ट्वा व्यस्मरन्[40] देवदेवम् ॥ १२.३१ ॥

आदौ ह्रस्वत्वेन वत्सानुवृत्त्या मात्रापादौ वर्तयन् दृश्यमानः ।
कुर्वन्नन्याश्चाग्र्यरूपा विवृत्तीर्गोविन्दश्रीरास गोविन्दभक्तः ॥ १२.३२ ॥

माङ्गल्याङ्गव्यक्तभावा त्रिलोकी[41] रङ्गारूढा विस्मयं प्रापयन्ती ।
कृष्णेवान्या मान्यविन्यासपादा रेजे माध्वी सुस्वरा वेदवाणी ॥ १२.३३ ॥

गाम्भीर्यार्यैर्युक्तमौदार्यकार्यैर्नानानादस्याध्यमुच्चारणं तत् ।
शिक्षाशिक्षालक्षणानां हि लक्ष्यं मान्यं मन्ये धन्यबुद्धेरतुल्यम् ॥ १२.३४ ॥

---

[38] ह्यच्छुर्हं
[39] तेजोराजी
[40] ह्यस्मरन्
[41] त्रिलोकी

कात्पीः कूतीर्व्यञ्जयञ्छान्दसीश्च व्यक्तं शाब्दं शास्त्रमुद्भाव्य भूयः ।
स व्याचख्यावुक्तनैरुक्तमार्गो ज्यायान् ज्योतिर्वेदिनां वेदमित्थम् ॥ १२.३५॥

श्रौते व्याख्योच्चारणे चारुणी ते मादृग्देही वर्णयेदस्य को नु ।
वागीशानैर्वाग्विहङ्गेशजीवैर्भूर्याश्चर्यैर्वर्णिते ये प्रणम्य ॥ १२.३६॥

छन्दःसार्थं सार्थमत्रामुनेत्थं प्रोक्तं श्रुत्वा ब्राह्मणा ब्रह्मणेव ।
सर्वे सौम्या जिष्णुजिज्ञासयाऽमी प्राप्य प्रोचुश्चित्रकायाभिधानम् ॥ १२.३७॥

प्राज्यप्रज्ञः प्राज्यया प्रज्ञयाऽसौ हन्तावोचन्मन्त्रवर्णाभिधेयम् ।
तत्प्रत्यर्थी प्रार्थ्यते वक्तुमेतत् प्राज्ञास्माभिः श्रोतुकामैर्भवांश्च ॥ १२.३८॥

इत्युक्तस्तैरेष विस्तारिबुद्धेः प्रास्तुं साम्यं सम्प्रवृत्तो दुरात्मा ।
हास्योऽत्राभूद्वासुदेवप्रभार्थी यद्वत् पूर्वं पौण्ड्रको वासुदेवः ॥ १२.३९॥

आङादेशादुत्तरं रादिशब्दं श्रुत्वा नारेत्युक्तवन्तं पदं तम् ।
व्याख्यालौल्यादैतरेयादिसूक्ते पृथ्वीदेवा निन्दनीयं निनिन्दुः ॥ १२.४०॥

शार्दूलाख्यां प्राप्य सम्भावितः प्राक् लोके धूर्तो मायिगोमायुरेषः ।
वादिद्वीपिध्वंसिनं मध्वसिंहं प्राप्तो हीत्थं शब्दशेषो बभूव ॥ १२.४१॥

कृष्णाभीष्टा शास्त्रविस्पष्टसञ्ज्ञा या स्वीया श्रीः पालिता सद्द्विजेन ।
पद्माख्यासत्सैन्धवेनाहृतां तां शुश्रावाग्र्यानन्दतीर्थाख्यपार्थः ॥ १२.४२॥

तूर्णं तीर्णादभ्रमार्गोऽथ सार्यः सम्प्राप्तोऽसौ गोगणैर्भीषयित्वा ।
संयम्यान्तर्यन्तृकामेन हास्यं सम्प्राप्तश्रीर्निर्जितं तं जहास ॥ १२.४३॥

दुष्टात्माऽसौ भद्रमेकाकिनं यः क्षेप्तुं हेतुः सौख्यदाख्यं बभूव ।
हर्यशोऽयं तं न चक्षाम भूयस्तोके सन्ने सूकरं केसरीव ॥ १२.४४॥

तस्य त्रासात् पृष्ठतस्तिष्टतोऽभूत् क्षेमापेक्षी यो जनः प्राग्जितोऽपि ।
मध्येऽन्येषां गोततीस्तत्प्रयुक्ताः सोऽद्याज्जिष्णुः पञ्चषैर्गोविशेषैः ॥ १२.४५॥

विष्णोर्भूयः शोभयद्भिः पदान्तं पारम्पर्येणेर्यमाणैरवार्यैः ।
गोव्रातैस्तं दारयित्वा न्यगृह्णात् कञ्चाख्यानं सिन्धुपं मध्वपार्थः ॥ १२.४६॥

आस्तामास्तामेष वो विश्वमोषो रे रे मायावादिचोरा द्रवेत ।
द्रष्टा द्रष्टा निग्रहीता ध्रुवं वः प्राप्तः कालो द्राग्गुहान्तं प्रवेष्टुम् ॥ १२.४७॥

तेजोविद्वच्चक्रचन्द्रस्य लीनं विध्वस्तालं वादिनक्षत्रलक्ष्मीः ।
विश्वव्याप्तं यत्तु तद्दीप्तिमूलं युष्मत्प्रेष्ठं तन्निरस्तं तमश्च ॥ १२.४८॥

पूर्वाशामापूर्य विश्वप्रकाशी गोसन्दोहैः सप्तविद्याख्यवाहः ।
युष्माभिः किं नैक्षि देदीप्यतेऽसौ देवः साक्षात्सर्ववित् सर्वदीपः ॥ १२.४९॥

सर्वाधारं ब्रह्मसञ्ज्ञं विहायो रम्याकारं शारदेन्दीवराभम् ।
सन्निर्णीतं गुण्यलं शब्दभेदैर्मध्वादित्यं संश्रितं कोऽपि धत्ते ॥ १२.५०॥

विधावत विधावत त्वरितमत्रिवादासुरा
अदभ्रधिषणाभिधो नरहरिर्हि जाज्वल्यते ।
स युक्तिनखरैः खरैर्मुखरमूर्खदुःखाङ्कुरै
र्विदारयति दारुणप्रवचनप्रणादोऽप्रियान् ॥ १२.५१॥

धत्ते रूपाण्यनन्तान्यपि भुवनपतेर्यो हृदाऽप्येकपक्षो
दक्षः सङ्घयोऽखिलेभ्योऽप्यमृतमिह ददौ केवलं यो न मात्रे ।
पक्षिश्रेष्ठोऽपरः सन्नमितमतिपदोऽसम्पदे स्यादयं वो
मा दर्प मायिसर्पा भजत भजत तास्ता गुहा द्राग्द्विजिह्वाः ॥ १२.५२॥

वेदव्रातसुदर्शनः परिलसत्तर्काख्यशङ्खध्वनि-
र्विभ्राजिष्णुपुराणसंहतिगदः श्लोकौघशार्ङ्गान्वितः ।
सत्सूत्रेष्वितिहासनन्दकचणो मध्वाख्यनारायणः
प्राप्तो वो निजिघृक्षया द्रवत हे मायाविदेवद्विषः ॥ १२.५३॥

इति निगदति मायावादिविद्वेषवेषे
शुभजननिकरे स्वारामतोऽस्मात् प्रयातः ।
न्यवसदमरधिष्ण्ये प्राग्न्यवाटाभिधाने
गुरुमतिरभिनन्दन् देवमानन्दमूर्तिम् ॥ १२.५४ ॥

इति श्रीमत्कविकुलतिलक त्रिविक्रमपण्डिताचार्यसुत

नारायणपण्डिताचार्यविरचिते श्रीमत्सुमध्वविजये

महाकाव्ये आनन्दाङ्के द्वादशः सर्गः

त्रयोदशः सर्गः

पृथुदर्शनमुत्थितं कृतार्थं पृथिवीभृत्प्रणतिं गृहीतवन्तम् ।
निजशिष्यमुदेऽथ सह्यमाप्तं पुरुषः कश्चिदुपाययौ कदाचित् ॥ १३.१ ॥

भगवानिह नः स्वकिङ्कराणामचिरेणाव्रजतादनुग्रहार्थम् ।
इति कार्यचिकीर्षयाऽर्थयत् त्वां नृप इत्यभ्यधितैष तं प्रणम्य ॥ १३.२ ॥

अथ माधवतीमपास्य काष्ठां व्रजता प्रैधिततेजसा प्रतीचीम् ।
परिशोधयता स्वपादसङ्गात् पृथिवीं प्राज्ञदिवाकरेण रेजे ॥ १३.३ ॥

अशुभानपहाय मायिजुष्टानधमाद्रीनिव गोत्रनिम्नगौघैः ।
सुजनैस्तरसाऽभिगम्यमानः परमस्नेहतया क्रमप्रसन्नैः ॥ १३.४ ॥

सुमनःफलशोभिनोऽत्र पुंसो नमयन् गोभिरनोकहानिवोच्चान् ।
अपि भङ्गमुपानयन्ननम्रान् दृढभावादपरानवार्यवीर्यः[42] ॥ १३.५ ॥

गमनोत्सवविस्मितैर्निषेव्यो विविधैर्जानपदैर्जनैरजस्रम् ।
परिसत्वरकीर्तिरार्तिमुक्तयै पुरुषैर्दूरभुवश्च गम्यमानः[43] ॥ १३.६ ॥

अमरैरमरानुगैर्मुनीन्द्रैरपरेक्षाविषयैश्च[44] सेव्यमानः ।
हरिपादसरोजसङ्गसारो भुवने पावनपावनो निकामम् ॥ १३.७ ॥

अयमप्रतिवारणः प्रयाणे परमानन्दसुतीर्थसूरिराजः ।
विबभावतिवेलमच्छरूपः सुरसिन्धोरिव सन्ततप्रवाहः ॥ १३.८ ॥

समयेन गतोमहीयसासौ[45] विषयं स्तम्भपदोपसर्जनाख्यम् ।
मदनाधिपतेः सुधामधाम प्रविवेशाखिललोकवन्दनीयम् ॥ १३.९ ॥

क्षणदामिह तावदूषिवांसं विहिताहर्मुखयोग्ययोगमेनम् ।

---

[42] दृढभावदनपरान
[43] पुरुषैर्दूरभवैश्च
[44] अपरेरोक्षा
[45] गतोऽमहीयसासौ

गमनोद्यमलक्षणैर्व्यजानन्[46] गमनायोद्यतमाशु शिष्यसङ्घाः ॥ १३.१०॥

पुरतो विसृताः समाधिशुद्ध्यै यतयस्तत्र पटीः कषायवेषाः ।
सहसोदहरन् स्वयोग्यमुद्रायुतदण्डादिकधारणोद्यमेन ॥ १३.११॥

अवधार्य विशेषकारिशङ्खप्रकटाङ्कान् सुधिया गतार्द्रभावान् ।
लसिता तुलसीस्रगस्य कण्ठे हरिनिर्माल्यतयोचिता न्यधायि ॥ १३.१२॥

यतधीर्गुरुचक्रिमूर्तिपूर्णं यतनिश्वासवचा विशोध्य पाणी ।
गुणकुण्डलमण्डितं विमानं गुणबद्धं कवचावृतं बभार ॥ १३.१३॥

सकमण्डलुमण्डलावलम्बं स्वयमेवालघुपुस्तकादिभारम् ।
युवशिष्यगणो दधे न यत्नान्न हि दाक्ष्यस्य समोऽपरो गुणोऽस्ति ॥ १३.१४॥

अतिसम्भ्रमतः परिभ्रमन्तं भरदामानवलोकिनं चिराय ।
अनुयोगपरं मुहुः प्रमत्तं जहसुर्नूतनशिष्यमत्र केचित् ॥ १३.१५॥

अथ तत्क्षणघट्टितोरुघण्टाघननादव्यपदेशतः परेण ।
अमितप्रमतिः प्रचोदितोऽसाविति निर्यत्सु निजेषु निर्जगाम ॥ १३.१६॥

धृतमातपवारणं वरेण्यं व्रतिराजं तमुपर्युपर्युदारम् ।
उदयन्मिहिरोपरिष्ठपूर्णद्विजराजश्रियमाययावभूताम् ॥ १३.१७॥

भुवनत्रयधारिणं[47] मुकुन्दं दधदन्तः स दधे गुरुः स्वयं च ।
अपि केनचिदित्यदो न चित्रं ननु स प्राणपतिर्वभार तं च ॥ १३.१८॥

यतयो गृहिणोऽथ वर्णिमुख्याः श्रुतिगास्त्यक्तनिषिद्धकाम्यभावाः ।
इह मूर्तिधरा इव स्वधर्माः शतसङ्ख्याः शतसङ्ख्यमन्वगच्छन् ॥ १३.१९॥

परिवारजना न मार्गदुःखं प्रययुः पूरुषरत्नमीक्षमाणाः ।
इति नाद्भुतमस्य हि प्रयान्ति स्मृतिमात्राद्भविनो भवापवर्गम् ॥ १३.२०॥

मदनेश्वरवल्लभप्रदेशे प्रभुमायान्तमथाभ्यपद्यत द्राक् ।
जयसिंह इमं नृसिंहवर्यः शुभधीः स्तम्भविशिष्टसिंहनामा ॥ १३.२१॥

---

[46] व्यरजानन्
[47] भुवनत्रयभारिणं

अवतीर्य पुरैव वाहनात् स्वादपि मार्गादपसार्य सैनिकान् सः ।
सह कैश्चन भूसुरैरवाप्तस्त्रिजगत्पूज्यपदान्तिके ननाम ॥ १३.२२॥

पृथिवीपतिनाऽनुगम्यमानो विनयाङ्गक्तिरसार्द्रमानसेन ।
अचिरेण स विष्णुमङ्गलस्य प्रययावायतनोत्तमस्य पार्श्वम् ॥ १३.२३॥

नरदेवदिदृक्षया समेता उभयग्रामजना जनाः परे च ।
उपयान्तमनन्तमानसं तं मुहुरैक्षन्त कुतूहलाब्धिमग्नाः ॥ १३.२४॥

पुरतो मधुरस्वरैर्वदद्भिः स्वकृताः कर्णसुखा मुकुन्दगाथाः ।
धृतपङ्कजबीजचक्रचिह्नैः कृतनृत्यै[48]श्चतुरैर्निषेव्यमाणम् ॥ १३.२५॥

कलिताञ्जलिना स्फुटानुयातं जनसम्बाधसहेन भूमिभर्त्रा ।
करुणाविषयं चिकीर्षुणा स्वं व्रजता किङ्करतामकैतवेन ॥ १३.२६॥

इदमित्थमितीक्षणैर्नराणामपरिच्छेद्यमहिष्ठधामरूपम् ।
अधिकं धरणीमलञ्चिकीर्षुं स्फुटमुद्यन्तमिव द्युनाथमन्यम् ॥ १३.२७॥

अशनैः शनकैरिवाव्रजन्तं युवसिंहप्रवरप्रगल्भयानम् ।
अतिपाटलपादपल्लवाभ्यामवनीं[49] पावनतामलं नयन्तम् ॥ १३.२८॥

नखनिर्जितपद्मरागरागं वरकूर्मप्रपदं निगूढगुल्फम् ।
सुरवर्यकराग्रसेव्यजङ्घं द्विरदोदारकरोपमोरुयुग्मम् ॥ १३.२९॥

शुभशुद्धनितम्बबिम्बराजन्नवकौशेयविशेषबाह्यवस्त्रम् ।
तनुकुक्षिगलालिकेषु रेखात्रितयेन प्रकटेन शोभमानम् ॥ १३.३०॥

मृदुसूक्ष्मघनारुणाविकाच्छप्रकटप्रावरणेन[50] भासमानम् ।
अतिनूतनतिग्मभानुभासां निकरेणेव सुवर्णसानुमन्तम् ॥ १३.३१॥

पृथुवक्षसमुन्नतांसभित्तिं गुरुवृत्तायतहृद्यबाहुदण्डम् ।
परमारुणपाणिपल्लवान्तःस्फुरितोर्ध्वध्वजलाञ्छनादिमन्तम् ॥ १३.३२॥

परिपूर्णशशाङ्कबिम्बशङ्काविषयं प्राक् सहसाऽवलोकनेन ।

---

[48] कृतनृत्तै
[49] अवनिं
[50] प्रकटवरप्रावरणेन

अकलङ्कतया परं विविक्तं वदनं बिभ्रतमच्छविभ्रमाब्धिम् ॥ १३.३३॥

अतिसुन्दरमन्दहासराजन्नवकुन्दाभरदं शुभारुणोष्ठम् ।
कमलायतलोचनावलोकैरपि लोकान् सकलान् प्रहर्षयन्तम् ॥ १३.३४॥

अतिभासुरकर्णभासितश्रीतुलसीगुच्छमतुच्छकान्तिगण्डम् ।
भुवनत्रयभूत्यभूतिदाने चतुरभ्रूवरविभ्रमं सुमौलिम् ॥ १३.३५॥

सकलावयवान् स्फुटं मिमानाः प्रतिमालक्षणदर्शनाय लक्ष्यम् ।
चतुरा विदधुर्यदीयगात्रं स सुलक्ष्मेत्यधुना निगद्यते नो ॥ १३.३६॥

अतिलोलदृशां समीक्षितुं स्वं जनसम्बाधभयेन दूरभाजाम् ।
समदर्शयदूर्ध्वमोरसोऽसौ दययैवोरुजनौघमध्यगोऽपि ॥ १३.३७॥

सविकासदृशां कृताञ्जलीनां जनतानां परमादरान्नतानाम् ।
वलयेन वृतः प्रियं मुरारेः प्रविवेशायतनं प्रबर्हबोधः ॥ १३.३८॥

विविधप्रभुमध्यसन्निषण्णो नरदेवेन समं स गूढदेवः ।
विबभावुडुराडिवोडुमध्ये सह मह्यास्तनयेन पूर्णबिम्बः ॥ १३.३९॥

अवदत् स कथां रथाङ्गपाणेर्भगवान् भागवते भवापहन्त्रीम् ।
अनुरूपगुणस्वरादिभाजा[51] निजशिष्यप्रवरेण वाच्यमाने ॥ १३.४०॥

कथनं तदुदारधैर्यसारं मधुरं पुष्कलभाववत् प्रसन्नम् ।
विदुषोऽविदुषोऽपि शृण्वतोऽलं व्यधितानन्दरसाम्बुधौ निमग्नान् ॥ १३.४१॥

गमनासनसङ्कथादिलीलाः स्मृतिमात्रेण भवापवर्गदात्रीः ।
कथमप्यमराः प्रपञ्चयेयुर्ननु मध्वस्य न मादृशोऽल्पबोधाः ॥ १३.४२॥

सुतपःकवितादिसद्गुणानां लिकुचानां कुलजोऽङ्गिरोन्वयानाम् ।
अभवद्गुहनामको विपश्चित् कविवर्योऽखिलवादिवन्दनीयः ॥ १३.४३॥

दयिताऽस्य सती गुणानुरूपा विधिवीर्येण मुहुर्मृतप्रजाऽपि ।
अभजद्भुवनप्रभू हरीशौ सुतकामा वसुदेवसूनुभक्ता ॥ १३.४४॥

परमेश्वरयोः प्रसादयोगात् सुतरत्नं तदसूत सूरिपत्नी ।

[51] अनुरूपकूलगुणस्वरादिभाजा

परिषत्पदपत्तनेषु नार्घो विविदे यस्य समः परीक्षकाग्र्यैः ॥ १३.४५ ॥

वदनेन्दुमवेक्ष्य नन्दनस्य स्वकुलोत्तारणदक्षलक्षणस्य ।
कृतकृत्यतया क्रियाः प्रकुर्वन् कविराख्यादुचितां त्रिविक्रमाख्याम् ॥ १३.४६ ॥

कलभाषण एव सूरिपोतः कविरासीदनवद्यपद्यवादी ।
अवभाति ननु प्रभाप्रभावी भगवान् बालतमोऽपि तिग्मभानुः ॥ १३.४७ ॥

सकलाङ्गयुतावभातशाखः समये प्राप्त उदारपक्षिसेव्यः ।
स ससर्ज सदध्वगोपकृत्यै लिकुचः काव्यफलं रसाभिरामम् ॥ १३.४८ ॥

प्रतिपादितमात्मना[52] यथार्थं पृथुमायासमयस्य दुर्घटत्वम् ।
स्वगुरौ परिहर्तुमक्षमेऽपि श्रुतवान् तत् स्ववयस्यबोधितोऽलम् ॥ १३.४९ ॥

भगवत्युदिते सगोविलासे वटुभावं त्यजति त्रिविक्रमार्ये ।
अपि भानुपुरःसराः समस्ताः प्रययुः कीटमणिप्रभत्वमाशु ॥ १३.५० ॥

अतिदक्षमतिं सपादलक्षे समये मायिजनस्य युक्तिशूरम् ।
महितं हि महीतले महिम्ना जनको नन्दनमब्रवीदुपांशु ॥ १३.५१ ॥

शृणु वाचमिमां विचारितार्थां न कलौ निर्गुणभावना सुखाय ।
इति गौणविमुक्तये गुणाढ्यं स्मर[53] देवं सुत वासुदेवमेव ॥ १३.५२ ॥

इति तातवचो निशम्य किञ्चित् तरलात्माऽपि विचार्य शास्त्रसारम् ।
परमेव स पारमारुरुक्षुर्विगुणोपास्तिमुपाशृणोत् परेभ्यः ॥ १३.५३ ॥

निजधर्मरतो गृहिप्रबर्हः कलिकालाकुलितान्तरोऽपि हन्त ।
नितरां निशितात्मना निसर्गात् स्फुटमालोचयदित्यसौ कदाचित् ॥ १३.५४ ॥

रचितं ननु सूत्रमत्र मानं विदुषां सत्यवतीसुतेन साक्षात् ।
अपरस्परसङ्गतानि भाष्याण्यपि[54] सर्वाणि न मानतां व्रजेयुः ॥ १३.५५ ॥

यदि तेषु निराग्रहान्तराः स्मः सुघटं नोपलभामहे हि किञ्चित् ।
न तथापि परम्परोपयातं न पठामः प्रणयेन साङ्करीयम् ॥ १३.५६ ॥

---

[52] प्रतिपादिभावितमात्मना
[53] भज
[54] भाष्याण्यथ

घटनोपनिषत्सु नाल्पबुद्धेः सुघटेत्यभ्युपगम्य चिन्तयामः ।
न विमुक्तिमुपैति कोऽपि मुक्त्वा समयोक्तामिह यामिमामुपास्तिम् ॥ १३.५७॥

विततः सुखसच्चिदद्वयात्मा समुपास्यो विहितो हि तत्त्वविद्भिः ।
स च नावयवी निरूप्यते चेद्द्युतिमात्रं च नहीत्यदो रहस्यम् ॥ १३.५८॥

यदि चेदृगुपास्यतेऽस्य रूपं तिमिरत्वेन विभाति पारिशेष्यात् ।
फलमप्यथ मुक्तिरीदृशी स्यादिति नो नैव धिनोत्युपास्तिरेषा ॥ १३.५९॥

अथ वेदपुराणभारतादि स्वयमालोच्य यथावबोधमत्र ।
गुणवन्तमुपास्महे मुकुन्दं स्मृतिधर्मान् भृश[55]माचरन्त एव ॥ १३.६०॥

अवधार्य यदेतिकार्यमार्यः स विवेकादुपचक्रमे विधातुम् ।
परिपूर्णमतेर्जगत्सु कीर्तिं परिपूर्णामशृणोत् तदा विशुद्धाम् ॥ १३.६१॥

विहिनस्ति हि नो जनोऽतिवाग्मी समयं कोऽपि परम्परोपयातम् ।
क्षिप तं त्वमपारयुक्तिशूरो न परे तत्र समर्थतां व्रजेयुः ॥ १३.६२॥

तव वेदनदीर्विगाह्य भूयः समयाम्भोधिषु कुर्वतो विहारम् ।
नवकाव्यरसप्रियस्य वादिद्विरदेन्द्रप्रतिवारणो न जज्ञे ॥ १३.६३॥

उपयाहि यशः शशाङ्कगौरं निजयूथस्य भयं निराकुरु त्वम् ।
अधुना विधिनोपपादितं त्वं[56] प्रतिवादिप्रतिवारणं निवार्य ॥ १३.६४॥

इति मायिजनेन तत्र तत्र स्वजनत्वेन स तावदर्थ्यमानः ।
अनुकूलवचा महिष्ठमानो मनसा संशयमाप संशयच्छित् ॥ १३.६५॥

सितमध्ववचःसृणिप्रयोक्तॄन् पुरुषानेष विषादयन् कवीभः ।
विविधोत्तरधूलिपातनेन प्रतिघेनाधिकमन्धयाञ्चकार ॥ १३.६६॥

क्षणदासु विचक्षणः स वीक्ष्य प्रचुरप्रज्ञमनोज्ञशास्त्रसारम् ।
अपराविदितः प्रसादगर्भं विदधे विस्मयमान्तरं महान्तम् ॥ १३.६७॥

विदितवान् व्यवहृत्य सुदर्शनं बहुलबोधमवेक्ष्य स निश्चयात् ।

[55] स्पुटम्
[56] तं

अपि न तस्य मतं सहसाऽऽदद ननु विमृश्य कृती कुरुतेऽखिलम् ॥ १३.६८॥

तं विष्णुमङ्गलगतं बहुलप्रबोधं प्राप्याभ्यवन्दत तदाऽयुगविक्रमार्यः ।
आनन्ददं स चतुराननहासलक्ष्म्या तत्त्वं प्रवेत्तुममरेन्द्र इवाब्जयोनिम् ॥ १३.६९॥

इति श्रीमत्कविकुलतिलक त्रिविक्रमपण्डिताचार्यसुत

नारायणपण्डिताचार्यविरचिते श्रीमत्सुमध्वविजये

महाकाव्ये आनन्दाङ्के त्रयोदशः सर्गः

चतुर्दशः सर्गः

परिवृढघनसङ्घे राजसिंहोर्जशक्त्या
त्यजति मलिनभावं नीरसत्वान्निकामम् ।
स्फुटमुदयति तेजस्व्युज्ज्वले मध्वभानौ
सुजनजलजकान्त्यै विश्वमासीन्मनोज्ञम् ॥ १४.१॥

कृतमपकृतमार्यैः क्षम्यतां क्षान्तिभूषै-
रिति मृदु वदतां सम्प्रार्थनाभिः प्रभूणाम् ।
अपहृतमपरेषां मन्त्रतो ग्रन्थजातं
दशहृदयनियोगादग्रहीच्छङ्करार्यः ॥ १४.२॥

परिवृतमवनम्रैर्ग्रामणीग्राम्यपूर्वैः
अवनतमुरुचेतः पादपार्श्वे नृसिंहम् ।
सहजविजयतोऽयुग्विक्रमार्यः प्रसन्नः
कविकुलतिलकोऽसावाशिषाऽतोषयत् तम् ॥ १४.३॥

उपचरति नितान्तं हन्त पौरन्दरीधू-
र्द्युसदसि भजतो यं दुर्लभा दभ्रभाग्यैः ।
दिशतु स परमानन्दाग्र्यतीर्थाङ्घ्रिरेणुः
धरणिधर सुखं ते सन्ततं स्वान्तरेति ॥ १४.४॥

अनतिपरिचितस्याप्यस्य सोऽयं कवीन्द्रो
गुणरसमतिगूढं ज्ञातवानित्यचित्रम् ।
मधु मधुकरराजो निष्पतन् पौष्पमातुं
ननु परिचयहीनः काननेऽपि प्रभुः स्यात् ॥ १४.५॥

अखिलखलकुलानां वर्धयन् द्वेषदोषं
विदधदपि नराणां कौतुकं मध्यमानाम् ।
स्वगतिसमुचितानां भूतिदायी शुभानां
बहुलहृदिह निन्ये शर्वरीः काश्चिदेवम् ॥ १४.६॥

उदयति विनताया नन्दने साध्यकाले
स कृतसकलकृत्यः कृत्यवेदिप्रवेकः ।

अरुणयवनिकान्तर्ब्रह्म नारायणाख्यं
गुरुगुणमभिदध्यौ योग्ययोगासनस्थः ॥ १४.७॥

अतिधवलितदन्ता दन्तकाष्ठैः प्रशस्तै-
रपि युगपदनेके सस्मुरत्र व्रतीन्द्राः ।
गुरुभिरभिहितेष्वाचारभेदेषु निष्ठां
स्फुटमवगमयन्तः सौष्ठवात् कर्मणां च ॥ १४.८॥

चरमसमयसुप्ताः पूर्वमुत्थाय शिष्या
गुरुजनपरिचर्यां चक्रिरे दुष्करां च ।
सबहुमति तदाद्यप्यार्धरात्रात् प्रसन्नाः ।
सुगतिरपरथैषां स्यात् कथङ्कारमिष्टा ॥ १४.९॥

श्रवणमननहेतोः प्राक् चिरायास्तनिद्रः
सपदि विवशयन्त्या निद्रया ग्रस्तचेताः ।
स्वयमपि नयति द्रागङ्गवस्त्रादि पूज्ये
झटिति विगतनिद्रः कोऽपि शिष्योऽन्वशेत ॥ १४.१०॥

विहितमविहितं प्रागेव कस्माद्विनिद्रैः
इति गुरुपरिवादाशङ्कया नम्रगात्राः ।
चिरमनवतरन्तः श्रावका मुक्तमार्गा
गुरुषु जलसकाशस्थेषु तूष्णीमतिष्ठन् ॥ १४.११॥

विपुलहृदयपार्श्वे दीपदीप्तिप्रदीप्ते
दरवरपरिपूर्णैर्वार्भिरर्घ्यादि दत्वा ।
यतिरतियतचेताश्चक्रिणोऽर्चानिकायात्
कुसुमसमितिमग्र्यामादरादुज्जहार ॥ १४.१२॥

अमृतमपि निरीक्ष्य स्रावि निर्माल्यसूने
घृतमिदमिति सद्यो भ्रान्तिमन्तोऽपि शिष्याः ।
श्रदधुरधिकवाक्यैर्विभ्रमास्तच्च पश्चात्
अनुदिनममृतान्नैस्तस्य सेव्यस्य शक्त्या ॥ १४.१३॥

अगमदुचितमन्त्रैस्तूदयानां त्रयाणां
कृतिभिरनुमतात्मा तत्र पञ्चाङ्गविद्भिः ।
उदयमहिमरोचिश्चक्रवर्ती त्रिशक्तिः
दधदतिवृहदन्तः षड्गुणं स्वात्मतेजः ॥ १४.१४॥

तिमिरनिकरकुम्भिव्रातमत्यन्ततीव्रं
स्थिरतरमखिलानां प्राणिनां रुद्धमार्गम् ।
भुवनभवनपूर्णं भानुमानञ्जनाभं
हरिरिव नखरैः प्राग्रश्मिजालैर्निरास ॥ १४.१५ ॥

मधुरपतगरावाः शान्तनैशाम्बुबाष्पाः
सपदि विपुलरागः स्वाभिसारात् प्रसन्नाः ।
अरुणतरणिरत्यच्छाम्बरा दिक्पुरन्ध्रीः
स्मितसरसिजवक्त्राः स्वैः करैरालिलिङ्गे ॥ १४.१६ ॥

प्रणतिरभसधूलीबद्धशोभाविशेषा
दधुरुपकृतिमत्तां साधुजालान्तरास्राः ।
समयमुपनतं संवेदयन्तो वयस्या
इव दशशतकेतोः केतवः श्रावकाणाम् ॥ १४.१७ ॥

निहितमुचितमुच्चं योगपीठं प्रवक्तुः
परिषदि परितोऽमी सत्वराः सत्वभाजः ।
द्रुतमवसितकृत्यैर्धन्यसन्न्यासिवर्गैः
श्रवणपरमकृत्यायोपतस्थुः समेताः ॥ १४.१८ ॥

बभुरमलगुणानां शोभनाच्छादनानां
मुररिपुनिलयानां हन्त वेदान्तिकीनाम् ।
सपदि सुविवृतानामन्तरर्था धियां वा
विविधकवलिकानां सञ्चयाः पत्रिकाणाम् ॥ १४.१९ ॥

अनतिविरलभावा अप्यनन्योन्यसङ्गा
ऋजुतरततनानापङ्क्तिसाम्यास्तशोभाः ।
द्विरदतुरगदेश्या दूरतो वर्जितान्ताः
कुशललिखितरूपा रेजिरे तेषु वर्णाः ॥ १४.२० ॥

सपदि[57] ददृशुरेके वाचनीयादिभागं
परिचयपटुताभ्यां तावदेके चिरेण ।
हरिगुरुनमनं द्राग्यत्नतोऽमी विधाय
प्रययुरपरसाम्यं सिद्धये स्याद्धि यत्नः ॥ १४.२१ ॥

[57] झटिति

यतवचसि जनेऽस्मिन्नानते सन्निरस्यन्
सिचययवनिकां तां सान्ध्यजीमूतरक्ताम् ।
रविरिव रविपूज्याङ्घ्रिः समाजान्तरिक्षे
व्यलसदतिशयालुः सन् सहस्रप्रकाशः ॥ १४.२२॥

त्रिभुवनवरतेजो व्यक्तवेदार्थशुक्ल
त्रितयरसतया ये वर्णिता वर्णवर्याः ।
पृथुमतिरथ तेषामैक्यमापाद्य सम्यक्
प्रवचनपरिशुद्ध्यै स्म प्रणौति प्रवीणः ॥ १४.२३॥

स्वरमचरमकाले मन्द्रमेवात्यजङ्घिः
स्फुटमुपनिषदन्ते वाचकैर्वाच्यमाने ।
प्रवचनमतिचित्रं प्राणभाजां श्रुतीनां
अमृतममृतभावस्यैष हेतुं चकार ॥ १४.२४॥

घनमिव सघनायेभ्योऽर्कसूनुः प्रसन्नः
शरशतमिव पार्थः संयुगार्थिभ्य उग्रः ।
अरतिविरहितः सोऽनारतं नोऽदिशन्नो
प्रतिवचनमदीनं चोदकेभ्योऽखिलेभ्यः ॥ १४.२५॥

अथ दशशतशोचिष्याप्रयाति प्रतीच्याः
प्रवचनमवसाय्य स्नातुमायात् तटाकम् ।
पृथुमतिरिह तावच्छ्रेष्ठसंसर्गलोलैः
समगमि सपदि स्वर्निम्नगाद्यैः सुतीर्थैः ॥ १४.२६॥

घनरसनिकरोऽसावन्तरत्यन्तशुद्धो
मुनिगण इव भूयः स्नेहवान् प्राग्दधानः ।
प्रतिकृतिमखिलज्ञस्यापरोक्ष्येण तावत्
स्फुटमलभत रूपं मज्जने सज्जनेष्टम् ॥ १४.२७॥

अपरिमितमनीषस्योल्लसच्छङ्खबाहो
रथचरणशिलानां तन्वतोऽत्राभिषेकम् ।
प्रतितनव उदारास्तास्वलं सन्निधातुः
तनव इव विरेजुः पाञ्चजन्यप्रियस्य ॥ १४.२८॥

अभिदधति मुनीन्द्रा द्वादशाब्दोपवास-
प्रतिमफलमलं यत्सेवनं भक्तियुक्तम् ।

अधिकममरनद्याद्यास्रवाद्धन्यमान्यात्
अपिबदलवबोधो विष्णुपादोदकं तत् ॥ १४.२९ ॥

तरणिभिरिव गौरैरूर्ध्वपुण्ड्रैर्द्विषड्भिः
सदरपरमचक्रोदीर्णतेजा हरीष्टः ।
मुररिपुविमुखानां दुःसहो देहभाजां
लयसमय इवान्यो मान्यधीराबभासे ॥ १४.३० ॥

समधिकधिषणस्य प्रेक्षमाणो जनौघः
प्रकृतिमधुरमास्यव्याजपूर्णेन्दुबिम्बम् ।
अमुचदपसरेति श्रावकोक्तेः पुराऽस्मिन्
प्रचलति पदवीं तां प्राञ्जलिस्तूर्णमारात् ॥ १४.३१ ॥

गुरुचरणसरोजद्वन्द्वनिर्णेजनाम्भो
दधति जननिकाये सर्वमुर्वीगतं च ।
अवनिरनभिनन्दिन्यप्यदश्चक्षमेऽसौ
कथमपि कथमेव स्यात् क्षमाख्याऽन्यथाऽस्याः ॥ १४.३२ ॥

अविदितरसभेदं शीतलं लध्वगन्धं
विमलममलपाणिः पाणिजैरप्रविष्टम् ।
वदनपवनभीत्या पार्श्वतो बिभ्रदग्र्यं
कमथ करकपूर्णं संयमीहानिनाय ॥ १४.३३ ॥

विहसितबिसभङ्गश्रीप्रकर्षं सितिम्ना
जलजममृतपूरैः पूरयामास रम्यम् ।
समयगुणविशेषालोचकैर्लालनीयः
ससुरभिसुमनोभिः स स्फुटं गौरपक्षः ॥ १४.३४ ॥

विमलमलयजाम्भोबिन्दुभिश्चर्चितार्चो
नवललिततुलस्याः पुष्पराज्याऽऽर्चयत् सः ।
स्थलजजलजवल्लीवृक्षवीरुत्समस्त
प्रसवविजयलक्ष्म्या मूर्तयेवेन्दिरेशम् ॥ १४.३५ ॥

स ददधिकबोधः षोडशात्रोपचारान्
व्यरहयदगुणान् द्वात्रिंशदागः पुरोगान् ।
अगणितगुणमुच्चैस्तोषयन् शार्ङ्गपाणिं
षडपि परमभक्त्याऽनूपचारान् दिदेश ॥ १४.३६ ॥

तमरुणमणिवर्णं दिव्यदेहाख्यगेहे
स्नपितमतिपृथुश्रद्धानदीचित्तवार्भिः ।
ननु स यजति नित्यं हृत्सरोजासनस्थं
न तु सकृदिति पुष्पैरष्टभिर्भावपुष्पैः ॥ १४.३७॥

कृतपरमसपर्यः सान्द्रसच्चन्दनाम्भः
परिमलितभुजोरोमण्डलांसो मनीषी ।
स्मितरुचिरमुखेन्दुः स्निग्धकौशेयवासाः
ससुरमुनिनराणां चक्षुषामुत्सवोऽभूत् ॥ १४.३८॥

परमथ परमान्नं प्राप्तमेवाप्रयासं
प्रभुरिह बुभुजेऽसौ वेदवादप्रवीणः ।
अजितपरमभक्तः सन्ततं मन्यमानः
सकलजगदधीशः प्रीयतां शौरिरित्थम् ॥ १४.३९॥

सहचरपरिकॢप्ते सूक्ष्मवस्त्रावृतेऽसा
ववितनुरुहरूपौशीरवर्ये निषण्णः ।
अरमयदिह नानाहृद्यविद्याविलसैः
कविजनपरिवारं मण्डयन् मण्डपाग्र्यम् ॥ १४.४०॥

अवसरमधिगम्य भ्रूविजृम्भादभीष्टो
मुखसततगलक्ष्मीभूत[58]पाणिप्रवालः ।
स्मितनयनविकासैस्तस्य विज्ञातभावः
श्रवसि किमपि कार्यं मन्त्रयामास मङ्क्षु ॥ १४.४१ ।

प्रणतिपरमकृत्याः सन्मतेर्ये जनौघा
विबभुरनतिदूरे सङ्गता[59]स्तानतीत्य ।
अहमहमिकयाऽऽशु प्राप्य पार्श्वं प्रणेमुः
बहव इह गृहस्थाः पूर्वसेवां विधातुम् ॥ १४.४२॥

विविधजनपदस्थाः प्राक् श्रुतेभ्यो गुणेभ्यः
शतगुणगुणमेनं विस्मिता वीक्षमाणाः ।
मुकुलितकरपद्मा आस्यतामित्यवाप्ताः
प्रचुरतरहृदा सम्भावयाञ्चक्रिरेऽन्ये ॥ १४.४३॥

[58] लक्षीभूत
[59] संहता

अलमलमनुवादेनानुवाच्येत पश्चा
न्ननु गुरव इदानीमुद्यता हि प्रवक्तुम् ।
न मननमधुना द्रागाव्रजेत्याह्वयत्तान्
श्रुतपरिचयसक्ताञ्छ्रावकाञ्छ्रावकाग्र्यः ॥ १४.४४॥

अधिकधिषणमेनं व्याख्यया शोभमानं
हरिमिव कविवर्यं सत्यवत्यास्तनूजम् ।
सततमनिमिषं सन्दृश्य सानन्दचित्ताः
समयमपि गतं संविन्दते न स्म लोकाः ॥ १४.४५॥

उदयमित इवास्तं यंश्च भानुर्बभासे
स्फुटमकलुषरूपो दर्शनीयोऽनुरागी ।
शुचिहरिपदमापत्सम्पदोराश्रितानां
न हि भवति विशेषः स्वप्रकाशोन्नतानाम् ॥ १४.४६॥

मरकतमणिवर्णे भूतधात्री पुरन्ध्र्या
लसति जलधिवासस्यर्धलीनः क्षणार्धम् ।
अरुणतरणिबिम्बच्छद्मना पद्मरागः
कपिशकरकलापोल्लस्यभूत् प्रेक्षणीयः ॥ १४.४७॥

अवनिवनवनध्रुग्वायुखाहम्म्महत्सु
प्रकृतिगुणसमेताव्याकृताकाश एकम् ।
ततमतनुमनाः सोऽचिन्तयत् सत् समाधा
वसुरसुरनरेभ्यः सद्गुणं नाथमन्यम् ॥ १४.४८॥

व्यदधत परिदृष्टज्योतिषः साधु सान्ध्यं
नियममवनिदेवा ज्योतिषोऽप्यावलोकात् ।
विहितमनुसरन्तो धर्मशास्त्रप्रवीणाः
सवितरि सवितारं चिन्तयन्तस्त्रिलोक्याः ॥ १४.४९॥

विविदुरतितरां ये देवताः षोडशोक्ता
हरहरिहयपूर्वान्त्या कलाभेदतोऽस्य ।
सुहुतमतिसृजन्तोऽग्न्याहितास्तेऽग्निहोत्रं
व्यधुरुचितमपूर्वं येन गायत्रलोकः ॥ १४.५०॥

विधुरयमकलङ्कः स्याद्यदि स्यादवश्यं

ननु निजसहजायाः सुन्दरास्येन्दुकल्पः ।
इति सुरललनाभिर्लालितः खेचरीभिः
समधिकमधुरिम्णा पूर्णचन्द्रस्तदोदैत् ॥ १४.५१॥

इनविरहमसह्यं प्राप्य पद्मैः सचक्रैः
चिरमपि परितप्तं पूर्वतप्तैः सुतुष्टम् ।
मृदुकुमुदचकोरैः पादसङ्गेन राज्ञः
कमपि सकलहृद्यं कल्पयेन्नैव दैवम् ॥ १४.५२॥

दलितेन्द्रनीलमणिनीलविभ्रमं
नवकुन्दकुड्मलसितद्विजावलि ।
स्मितया नगोत्तमशिरः सुजातया
वनमालया सुरभिताशयाऽन्वितम् ॥ १४.५३॥

मृदुगामिविमानसम्पदोऽरमयत् सुस्मितगोपसुन्दरीः ।
परितापविहीनमुज्ज्वलं सुततं सूक्ष्मतराम्बरं वरम् ॥ १४.५४॥

गोभिस्तमांस्यपनयन् गतिदं प्रजाना-
मर्थान्तरं स भगवान् प्रकटीचकार ।
सानन्दचिद्गुणगणं परिपूर्णसंवि-
च्चन्द्रस्तु शब्दगुणमित्ययमेव भेदः ॥ १४.५५॥

इति श्रीमत्कविकुलतिलक त्रिविक्रमपण्डिताचार्यसुत

नारायणपण्डिताचार्यविरचिते श्रीमत्सुमध्वविजये

महाकाव्ये आनन्दाङ्के चतुर्दशः सर्गः

पञ्चदशः सर्गः

भूयोबोधस्ततो भूयो व्याचख्यौ भाष्यमद्भुतम ।
ग्रामे ग्रामीणसामान्ये वसंस्तत्रामरालये ॥ १५.१॥

परपक्षरथारूढं खरतर्कमहायुधम् ।
त्रिविक्रमार्यं सोऽपश्यत् प्रतिवीरमिवाग्रतः ॥ १५.२॥

तदा तदाननाम्भोजाद्भूत्तोपन्यासभारती ।
सेना सेनाग्रहा दिव्या शिबिरादिव निर्ययौ ॥ १५.३॥

नात्यत्वरा नातिरया न स्खलन्ती निरन्तरा ।
अनानावयवेत्येव दवीयोभिः प्रकीर्तिता ॥ १५.४॥

सूत्रस्यन्दनवृन्दाढ्या दुर्वारश्रुतिवारणा ।
सूपपत्तिमहापत्तिर्विचित्रस्मृतिसन्निका ॥ १५.५॥

वर्धितोर्मिहरिप्रेष्ठा सुपयोधरसुस्वना ।
सवितानप्रकाशार्था सागरी श्रीरिवापरा ॥ १५.६॥

पद्मेशपदपद्मश्रित्कृत्याङ्गं पद्मजन्मनः ।
लालिता शिरसेशेन गङ्गेवाशेषपावनी ॥ १५.७॥

नारायणोऽनन्तगुणो ब्रह्माख्यो वेदवेदितः ।
विश्वकर्तेति विश्वज्ञः श्रुत्त्या युक्त्याऽप्यसीषधत् ॥ १५.८॥

प्रधानमपराधीनं कारणं परिणामि यत् ।
पयोवदिति चेत्साध्यवैकल्यं स्यान्निदर्शने ॥ १५.९॥

विवादाध्यासिता सृष्टिश्चेतनेच्छानुसारिणी ।
सृष्टित्वात्पटसृष्टिर्वेत्यनुमा पक्षसाधिका ॥ १५.१०॥

यच्चेतनाचेतनयोरङ्गाङ्गित्वादि मन्वते ।
सृष्टावीशानपेक्षायां तन्न शोभनतां व्रजेत् ॥ १५.११॥

सर्वविन्निर्मितं सर्वं कदाचित्कत्वहेतुतः ।
न यदेवं नो तदेवं यथात्मेतीश्वरानुमा ॥ १५.१२ ॥

बलाय सर्वानुमानां वेदाः स्युर्यैरपालिता ।
कामादेताः प्रवर्तन्ते कामिन्य इव भर्तृभिः ॥ १५.१३ ॥

कारणं परिणामि स्याद् ब्रह्म नो चेतनत्वतः ।
न यदित्थं नो तदित्थं यथा क्षीरपुरस्सरम् ॥ १५.१४ ॥

न विश्वकृत् पशुपतिः श्रूयमाणागुणत्वतः ।
चैत्रवत्किं पुनर्विघ्नब्रध्नाद्या बालशङ्किताः ॥ १५.१५ ॥

ननु सौख्यादिमान्नेशो दुःखादिरहितत्वतः ।
यो नैवं स्यात्स नैवं स्याद्यथा संसृतिमानिति ॥ १५.१६ ॥

एवं चेद्विमतो ज्ञानी न भ्रान्तिरहितत्वतः ।
य एवं नो स एवं नो भवीवेत्यनुमीयते ॥ १५.१७ ॥

सर्वज्ञस्याज्ञतां वेदः श्रद्धेयो विरुणद्धि चेत् ।
तस्यैवमानन्दमानन्दं वदन्नाश्राव्यसौ कथम् ॥ १५.१८ ॥

दुःखं परिजिहीर्षन्यः सुखं नाङ्गीचिकिर्षति ।
स हन्तापतितं दुःखमीशस्य व्यस्मरज्जडः ॥ १५.१९ ॥

यो दुःखसमवायोऽयं चैत्रे तेन ह्यभेदवान् ।
समवायः कश्चिदीशे तदनेकत्वमन्यथा ॥ १५.२० ॥

औपाधिकोऽस्य भेदश्चेत्सत्योऽसत्यः स्विदुच्यताम्
तत् द्वयं चोक्तदोषं हि मायिवन्मा वदेत्परम् ॥ १५.२१ ॥

ब्रूयुरौपाधिकं भेदं ज्ञानादीनां यदात्मनः ।
नीत्याऽनया तन्निरासात्स्यात्तस्यानन्त धर्मता ॥ १५.२२ ॥

गुणादिभेदे सम्बन्धमपेक्ष्याप्यनवस्थितेः ।
विशेषमात्रेणानन्त्यं गुणानां शोभते विभोः ॥ १५.२३ ॥

मन्यन्ते शून्यमेवान्ये तत्त्वमागमवैरिणः ।
मता माध्यमिकास्तेऽपि व्यक्ताश्छन्ना इति द्वये ॥ १५.२४ ॥

शून्यं ब्रह्माद्वयेनाहुः स्वांश्च वेदान्तिनोऽभ्यधुः ।
अतत्त्वावेदकं वेदं वदन्तश्चरमे खलाः ॥ १५.२५ ॥

परतत्त्वविवर्तत्वादपरस्याखिलस्य च ।
अविशेषत्वतश्चास्य नान्तरन्तरमेतयोः ॥ १५.२६ ॥

अखण्डखण्डनन्यायानखण्डमपि खण्डयन् ।
अखण्डयदखण्डज्ञो द्वयांश्चाखण्डलद्विषः ॥ १५.२७ ॥

विमतं कारणं न स्यादसत्वान्न यदीदृशम् ।
नेदृशं तद्यथा कुम्भकर्तेत्यत्रानुमीयते ॥ १५.२८ ॥

अहो[60] तापस नो शून्यं कारणं कुम्भकर्तृवत् ।
यत्संवृत्युत्थितं विश्वं तत्कारणमितीर्यते ॥ १५.२९ ॥

एवं चेत् कारणं मा स्म ब्रवीः शून्यं कथञ्चन ।
आयुष्मंस्तदधिष्ठानं व्युत्पित्सस्व गुरोर्गृहे ॥ १५.३० ॥

विवादस्य पदं न स्यादधिष्ठानमसत्त्वतः ।
वैधर्मेणैष दृष्टान्तः शुक्त्यादिवदितीर्यते ॥ १५.३१ ॥

अतत्त्वावेदकं मानमिति स्वव्याहतं यतः ।
तद्वादि तेन वेदस्य सोऽभिप्रैत्यप्रमाणताम् ॥ १५.३२ ॥

यं तत्त्वावेदकं वेद वेदान्तं वेददूषकः ।
तत्त्वस्यावर्णनीयत्वात्स तत्त्वावेदकः कथम् ॥ १५.३३ ॥

लक्षणाभिः प्रवर्तन्ते वाक्यानि तिसृभिर्यदि ।
विषयत्वं लक्षणानां तस्यैवानिष्टमागतम् ॥ १५.३४ ॥

किञ्चाखण्डेऽत्र वाक्यानि किञ्चिद्विदधते न हि ।
तान्यभ्यधुरभावं चेज्जाड्यादेस्तन्न शोभते ॥ १५.३५ ॥

---

[60] अङ्गो, अथो

अभावभावस्याभावाद्भावरूपस्य तस्य तु ।
भावाभावविशेषाणामभावादविशेषिणः ॥ १५.३६ ॥

यो वेदवेदितार्थानां नित्यं सन्त्यागसंश्रवी ।
वेदबाह्यो विपश्चिद्भिरेष निश्चीयतां ततः ॥ १५.३७ ॥

ज्यायसो दूषणेनैव धूर्तं मन्योऽपि दूषितः ।
पक्षयोरविशेषत्वादेतयोः सद्विपक्षयोः ॥ १५.३८ ॥

असत्वादित्यसौ हेतुरसिद्धो ब्रह्मवादिनः ।
मेति भाण्यविशेषत्वात्तत्त्वयोर्ब्रह्मशून्ययोः ॥ १५.३९ ॥

सोऽङ्गीकरोति चेत्सत्त्वं ब्रह्मणः स्याद्विशेषिता ।
न चेत्प्राप्तं पारिशेष्यादसत्त्वं न निरस्यतु ॥ १५.४० ॥

विगीतं न विचार्यं स्यान्नभाव्यं न फलप्रदम् ।
शून्यं ब्रह्माद्यमद्वैतं विधिधीगोचरो न यत् ॥ १५.४१ ॥

खपुष्पवदखण्डत्वाद्व्यतिरिक्तं निदर्शनम् ।
प्रमाणादिवदित्येवमूहनीयं यथेप्सितम् ॥ १५.४२ ॥

आम्नायानाममानत्वे धर्मादेरप्रमाणता ।
धर्माद्यभावे नो मानं प्रत्यक्षैकप्रमाणिनः ॥ १५.४३ ॥

न पौरुषेयं वचनं प्रामाण्येन विनिश्चितम् ।
पौरुषेयत्वतो यद्वद्वाक्यमुन्मत्तभाषितम् ॥ १५.४४ ॥

विमतः पुरुषोऽज्ञः स्यात्स्याच्चासौ विप्रलम्भकः ।
पुंस्त्वाच्चैत्रवदित्यस्ताः सार्वज्ञे केवलानुमाः ॥ १५.४५ ॥

दुःखाकरोति यद्दैवं दुःशास्त्रेषूग्र आग्रहः ।
दुःखाकरोति घोरः स्याल्लोकोऽतस्तद्वतां ध्रुवः ॥ १५.४६ ॥

आस्माकेऽपेक्षिते पक्षे मोक्षं दद्यादधोक्षजः ।
यत्र स्वानन्दिनः सन्तः सेवन्ते विषयान् बहून् ॥ १५.४७ ॥

स्वव्याहत्यादिनोपेक्ष्या मुक्तिर्या निर्विशेषता ।

कदेत्याद्यनुयोगेऽस्या विशेषः स्यान्नतूत्तरे ॥ १५.४८ ॥

अपि बुद्ध्यादिरहितः पुरुषार्थी न सर्वथा ।
निखिलानुभवाभावात् पुत्तलीकापुरोगवत् ॥ १५.४९ ॥

ज्ञानप्रयत्नवाञ्छावानीशो न ह्यशुभं व्रजेत् ।
स्वसामर्थ्येन तेनैवं तं च कुर्यात् स तादृशम् ॥ १५.५० ॥

दुःखव्याप्तं सुखं बद्धे दृष्ट्वा मुक्तेनिरस्यता ।
स्वरूपं च निरस्येत शून्यवादी तदा भवेत् ॥ १५.५१ ॥

ननुविप्रतिपन्नः स्यादूर्मिमान् देहवत्त्वतः ।
चैत्रो यथेत्युपाधिः स्यादत्र[61] चाशुद्धदेहिता ॥ १५.५२ ॥

अनैकान्तिकता हेतोर्देहवत्वादधीशितुः ।
सोऽदेहश्चेदनिच्छादिर्भवेच्छशविषाणवत् ॥ १५.५३ ॥

ज्ञात्रादिरूपमस्य स्याद्वैलक्षण्याय चेत्ततः ।
तदेव देहशब्दोक्तं न ह्यसौ प्राकृताकृतिः ॥ १५.५४ ॥

एवं स्वरूपदेहत्वं मुक्तस्याप्युररीकृतम् ।
नानिष्टभोगस्तेन स्यात् प्राकृतक्षेत्रसम्भवः ॥ १५.५५ ॥

विमतो नावयववान्विनाशित्वप्रसङ्गतः ।
पटवच्चेदवयवा निरस्यन्तेऽत्र कीदृशाः ॥ १५.५६ ॥

सिद्धसाधनता हेतोस्ते भिन्नाश्चेदचिन्मयाः ।
आत्मनो भेदरहिता एष्टव्या एव वादिभिः ॥ १५.५७ ॥

परमाण्वादिदेशेषु व्याप्त्यै व्यामादिकेष्वपि ।
यथात्मनः प्रदेशाः स्युस्तेषां नोऽवयवास्तथा ॥ १५.५८ ॥

मुक्तो रूपादिवित्सत्वाज्जडान्यत्वे सतीशवत् ।
दृष्टान्तोऽसाध्यविकलस्तस्य सर्वज्ञताग्रहात् ॥ १५.५९ ॥

ईश्वरो न सुखी तेन रूपाद्यनुभवन्नपि ।

[61] स्यात् तत्र

दुःखप्रसङ्गादिति मा वादि तद् व्याप्तिदूषणात् ॥ १५.६०॥

दृष्टान्तो यस्य नेष्टोऽयं तस्य स्याद्व्यतिरेकवान् ।
शिलावदित्यतः शुद्धचिद्देहेन्द्रियभोग्यसौ ॥ १५.६१॥

स्वानन्दविषये मोक्षे वेदोक्ते युक्तिसाधिते ।
द्वेषोऽयं वादिनां कस्मात्तद्विरुद्धेऽथवाग्रहः ॥ १५.६२॥

ततः स्वतः प्रमाणेन देवो वेदेन वेदितः ।
विष्णुर्मोक्षादिदातेति विश्वं भवति शोभनम् ॥ १५.६३॥

इत्यादीन् दर्शयन्त्यर्थान् व्याख्योपन्याससंयुतान् ।
त्रिविक्रमार्येण तदा विश्वाभिज्ञस्य शुश्रुवे ॥ १५.६४॥

अथा प्रायुङ्क्त विविधान् बोधचापगुणेरितान् ।
विपक्षयुक्तान् वीर्येण तीक्ष्णांस्तर्कशरानसौ ॥ १५.६५॥

चिच्छेदातुच्छधिषणस्तांस्तदा तर्कसायकैः ।
प्रयुक्तमात्रान् प्रहसन् ह्लीलयाऽतिशयालुभिः ॥ १५.६६॥

अधार्याणीतरजनैरनिवर्त्यानि पूरुषैः ।
विजिगीषुर्द्विजश्रेष्ठो वेदास्त्राणिप्रयुक्तवान् ॥ १५.६७॥

वाक्यैरतिबलीयोभिः प्रत्यस्त्रैरिव वैदिकैः ।
अर्थान्तरं प्रकटयंस्तान्यसौ सन्यवर्तयत् ॥ १५.६८॥

सप्ताष्टानि दिनान्येवं वादं कृत्वा सहामुना ।
निरुत्तरं च निश्चोद्यं चक्रे चक्रायुधप्रियः ॥ १५.६९॥

प्रणम्याचष्ट शिष्टोऽसौ क्षम्यतां नाथ चापलम् ।
पदपद्मरजोदास्यं ध्रुवं मे दीयतामिति ॥ १५.७०॥

व्याख्यां भाष्यस्य भूयोधीः श्रवणं सूरिनन्दनः ।
सन्तः प्रीतिमसन्तोऽन्यां सममारेभिरे ततः ॥ १५.७१॥

गुर्वाज्ञागौरवाट्टीकां कुर्वन् भाष्यस्य दुष्कराम् ।
षडर्धविक्रमार्योऽसौ महाचार्यमवोचत ॥ १५.७२॥

कवीन्द्रैर्न समाप्यन्ते सङ्गृह्यापि यतोऽनिशम् ।
न्यायरत्नानि भाष्याब्धेरस्य गाम्भीर्यमद्भुतम् ॥ १५.७३॥

दशोपनिषदो देवीर्देवा इव समीप्सिताः ।
युक्ताः प्रसादयन्त्यर्था एषु भाष्यालयेष्वलम् ॥ १५.७४॥

गीतातात्पर्यभाष्याभ्यामाभ्यां विश्वं प्रकाश्यते ।
गोगणैरप्रतीकारैरर्केन्दुभ्यामिवाधिकम् ॥ १५.७५॥

इतिहासपुराणाब्धेर्भवच्चित्ताद्रिलोडितात् ।
जातां भारततात्पर्यसुधां कः सन्न सेवते ॥ १५.७६॥

पुराणस्थानपान्थानामभाषात्रयवेदिनाम् ।
भवता सुसखा चक्रे श्रीभागवतनिर्णयः ॥ १५.७७॥

कस्तन्त्रसारं सम्प्राप्य न स्यात्पर्याप्तवाञ्छितः ।
अमरैराश्रितच्छायं कल्पद्रुममिवोत्तमम् ॥ १५.७८॥

लोकानामवलोकाय मार्गस्यास्य व्यधाङ्गवान् ।
करुणाकरनेत्राभे वादसन्मानलक्षणे ॥ १५.७९॥

एकाकी किल यश्चक्रे पदं मौलिषु विद्विषाम् ।
तत्त्वनिर्णयपार्थोऽयम केन नाम न पूज्यते ॥ १५.८०॥

वादादयः प्रकरणस्फुलिङ्गास्तनवोऽप्यलम् ।
विपक्षकक्षं क्षिण्वन्ति मारुतेन त्वयेरिताः ॥ १५.८१॥

अनन्तोऽर्थः प्रकटितस्त्वयाऽणौ भाष्यसङ्ग्रहे ।
अहो आत्मपरिज्ञात्यैः कृष्णेनेवाननान्तरे ॥ १५.८२॥

भगवंश्चित्रकवितां लौकिकीं दर्शयन् किल ।
गोप्यं भारतसङ्क्षेपमकृथा विश्वविस्मयम् ॥ १५.८३॥

नानासुभाषितस्तोत्रगाथादिकृतिसत्कृतीः ।
त्वयि रत्नाकरे रत्नश्रेणीर्वा गणयन्ति के ॥ १५.८४॥

एषु दभ्रमतीन्दभ्रान् हसत्युच्चैः सतां सभा ।
चिन्तामणींश्चिन्तयन्ती मितानप्यमितार्थदान् ॥ १५.८५ ॥

अपरोऽपीष्यतेऽस्माभिर्ग्रन्थेष्वेतेषु सत्स्वपि ।
सत्स्वपीन्द्रादिषु पुरा तारकारिरिवामरैः ॥ १५.८६ ॥

ग्रन्थेभ्य एभ्योऽगाधेभ्यो युक्तयो नः दुरुद्धराः ।
मनोमान्द्यात्ततो ग्रन्थं व्यक्ततर्कततिं कुरु ॥ १५.८७ ॥

इत्यर्थितो व्यधान्मध्वः सोऽनुव्याख्यां सतां सुधाम् ।
दुर्वादिगर्वाद्रिपविं मायिध्वान्तरविद्युतिम् ॥ १५.८८ ॥

युगपद्रचयन्नेनां कदाचित्स निरन्तरम् ।
चतुरश्चतुरः शिष्यांल्लीलयाऽलेखयत् खलु ॥ १५.८९ ॥

युक्ताया युक्तिमालायाः प्रोक्तायास्तत्र चात्मना ।
व्यक्तं चक्रे विवरणं कवीन्द्रैरेष दुष्करम् ॥ १५.९० ॥

मध्वेन्दोर्नित्यसम्बन्धान्निस्तमस्तापचेतसोः ।
वैकुण्ठं यातयोः पित्रोर्गृहेऽस्यावरजोऽवसत् ॥ १५.९१ ॥

विधिभ्रूविभ्रमभ्रश्यद्धनगोधान्यसम्पदा ।
निर्वेदिना वेदविदा तेनापे वेदवादिराट् ॥ १५.९२ ॥

पारिव्राज्यं प्रार्थयन्तं पादानम्रमिमं मुहुः ।
समयापेक्षयोर्वीक्षो गमयामास धाम तम् ॥ १५.९३ ॥

न जघास न सुष्वाप न जहास स धीरधीः ।
समयार्थी स्मरञ्ज्येष्ठं रामं रामानुजो यथा ॥ १५.९४ ॥

राज्ये कथञ्चिन्निक्षिप्य राजानं विरहार्दितम् ।
अवतारभुवं प्रायाद्गगवाञ्छरदत्यये ॥ १५.९५ ॥

विशुद्धद्विकुलं श्रौतं शुचिं कृतपितृक्रियम् ।
विरक्तं विषयान् भुक्त्वा व्यधान्मध्वोऽनुजं यतिम् ॥ १५.९६ ॥

रहस्यतिरहस्यं तद् ब्रह्म ब्रह्मसमो ददौ ।

अमुष्मै पञ्चतपसो न विदुर्यत्तपस्विनः ॥ १५.९७ ॥

प्रेमामृतप्रसन्नास्यस्मिताङ्गापाङ्गपूर्वकम् ।
श्रीविष्णुतीर्थनामास्मैः प्रीतितीर्थः प्रदत्तवान् ॥ १५.९८ ॥

श्रवणेनानुवादेन मननेनावृथाकरोत् ।
कालं वेदान्तशास्त्रस्य वेदान्तगुरुसोदरः ॥ १५.९९ ॥

स दान्तिभक्तिमाधुर्यपरिचर्यादिमेदुरैः ।
महाविटपिनं चक्रे गुरोः स्वस्थं कृपाङ्कुरम् ॥ १५.१०० ॥

अनन्तमतिकारुण्यकल्पद्रुमवतो जनैः ।
अवर्ण्यो महिमा तस्य लौल्यात्संवर्ण्यते मनाक् ॥ १५.१०१ ॥

चतुरोऽसौ प्रवचने मनुसंसिद्धिमान्मनः ।
सङ्ख्या मां पूरणी मागान्मध्वदासमिति व्यधात् ॥ १५.१०२ ॥

दिशं प्रयातं शशिनश्चरन्तं भुव्यशोधयत् ।
तीर्थकं विष्णुतीर्थं च विष्णुतीर्थश्च तीर्थकम् ॥ १५.१०३ ॥

अकामानामनेकेषां सिद्धिभूमिं तपस्विनाम् ।
तिरोहितात्मा प्रापासौ हरिश्चन्द्रमहीधरम् ॥ १५.१०४ ॥

द्वन्द्वदुःखानले वीरो मात्सर्येण विमत्सरः ।
तत्याज मत्वा तस्यासावशनादीन्धनायितम् ॥ १५.१०५ ॥

भक्तैरनुगिरं नीतं प्रार्थितो यतिशेखरः ।
पञ्चगव्यं पपौ किञ्चित्पञ्चमे पञ्चमे दिने ॥ १५.१०६ ॥

स त्यजन्साहसी तच्च तपस्तेपेऽतितापसम् ।
बिल्वपर्णैः क्षितौ पन्नैस्तृप्तिमान्सलिलैरपि ॥ १५.१०७ ॥

यथेष्टमध्यास्त शिलां यमी सुनियमी स ताम् ।
नाध्यासते यामेकाहं दैवभग्नास्तपस्विनः ॥ १५.१०८ ॥

पवनांशानुजो जित्वा पवनं रेचकादिभिः ।
विषयेभ्यो हृषीकाश्वान् मनोयन्त्रा समाहरत् ॥ १५.१०९ ॥

स्मरन्मुरारेराकारं दध्यावध्यात्मकोविदः ।
समाधिमाधिशमनं योगलभ्यं स लब्धवान् ॥ १५.११०॥

मौकुन्दे सुन्दरे रूपे स्वानन्दादिगुणार्णवे ।
स्वाश्चर्यरत्ने मग्नात्मा नान्यत्किञ्चिद्विवेद सः ॥ १५.१११॥

कामत्रासविहीनस्य तस्य सुज्ञानचक्षुषः ।
विना कैवल्यसाम्राज्यं नार्घो योगमणेरभूत् ॥ १५.११२॥

मध्वानुजे मध्वनाथो यं प्रसादं व्यधात्तदा ।
स चित्ताविषयत्वाद्वा गोप्यत्वाद्वा न वर्ण्यते ॥ १५.११३॥

अहो महाबोधसेवामहिमाऽस्मिन्युगे यतः ।
धन्योऽसौ सिद्धिमापेमां सोऽमरैरित्यलाल्यत ॥ १५.११४॥

तीव्रव्रतोऽतीन्द्रियविद्विद्याब्धिस्तर्कपण्डितः ।
अनिरुद्धपदाधारः प्रेष्ठः शिष्यस्तमाययौ ॥ १५.११५॥

तेन सम्प्रार्थितं प्राप्तं रूप्यपीठमिमं पुनः ।
कृत्स्नज्ञं कृपया स्वेषु सम्प्राप्तं मेनिरे प्रजाः ॥ १५.११६॥

कवीन्द्रतिलको विद्वच्छेखरस्तापासाग्रणीः ।
मध्वकेलीशुकोऽस्याभूच्छिष्यो व्यासपदाश्रयः ॥ १५.११७॥

असौ दास्यं ध्रुवं यान्तं महान्तं महतामपि ।
व्यधादनुग्रहं कुर्वन् सामर्थ्यैः कौतुकं नृणाम् ॥ १५.११८॥

आरुरोह दुरारोहं स परैः प्रीतिकृद्धरेः ।
महान्तं महिमानं च महीध्रं च गुहप्रियम् ॥ १५.११९॥

आकृष्टोऽस्य गुणैर्व्यासैर्यो गोदाया उपाययौ ।
स पद्मनाभतीर्थाख्यः शिष्योऽन्योऽभूत्सुचेतसः ॥ १५.१२०॥

श्रुत्त्या मत्त्या सदा भक्त्या विरक्त्या नित्यसेवया ।
तस्मै प्रसन्नः प्राज्येक्षः सद्यो विद्यां ददौ शुभाम् ॥ १५.१२१॥

वेदान्ताब्धिं न यो जातु जहौ विद्वत्तिमिङ्गलः ।
युक्तिप्रवाहसंरम्भात्परशास्त्रनदीचरः ॥ १५.१२२॥

व्याख्याप्रणादमात्रेण वीरंमन्यान्स्वमण्डले ।
मायाविग्रामसिंहान् यो वादिसिंहो निराकरोत् ॥ १५.१२३॥

मत्तदुर्वादिमातङ्गतर्कमस्तकदारणे ।
पञ्चास्यो योऽभवद्व्यक्तं चतुरास्योऽपि केवलम् ॥ १५.१२४॥

संन्यायरत्नावळिरप्युदपादि यतः शुभा ।
टीका परानुव्याख्यायाः अनर्घा बोधसागरात् ॥ १५.१२५॥

वेदप्रवचनाचार्यशिष्योऽसाविति पूजितः ।
सभ्यः सभायां यो वेदं व्याचख्यौ वेदसारवित् ॥ १५.१२६॥

अनयोः प्रथमे शिष्याश्चरमे चाभवन्निह ।
अनन्तबोधस्यानेके यतीन्द्रा बहुदेशजाः ॥ १५.१२७॥

वशीकृतहृषीकाश्च जननाद्युपमर्दिनः ।
नरसिंहपदाधारा अभ्यस्तोपेन्द्रनामकाः ॥ १५.१२८॥

अदीर्घान्याभिधाना ये श्रीमद्रामपदाश्रयाः ।
अप्रत्यक्षगुणोद्रिक्ता भक्तिवैराग्यसागराः ॥ १५.१२९॥

पादैः पुनन्तः पृथिवीं दर्शयन्तो हरेः पदम् ।
धूतदुस्समयध्वान्ता आदित्या इव गां गताः ॥ १५.१३०॥

मोक्षशास्त्रामृताम्बोधिसेवया नित्य निर्वृताः ।
चक्रिचारुतरार्चासु चक्रिणश्चरणार्चकाः ॥ १५.१३१॥

मध्वप्रशिष्या बहवः शिष्या येषां मुहुस्तथा ।
अलञ्चक्रुरलं पृथ्वीं सर्वे सद्गुणभूषणाः ॥ १५.१३२॥

सदा सकलसच्छास्त्रव्याख्यासौख्यामृताब्धिगाः ।
सर्वे दुर्वादिदुर्वादकाण्डखण्डणमण्डनाः ॥ १५.१३३॥

भूरिभक्तिभराः केचिदप्यल्पश्रुतिसम्पदः ।

अप्यल्पबोधा अपरे बहुश्रुतमहागुणाः ॥ १५.१३४॥

बहवो गृहिणोऽप्यस्मात्समग्रानुग्रहं ययुः ।
दीप्ता यत्राग्नय इव त्रयो लिकुचशेखराः ॥ १५.१३५॥

माध्वं नियोगं ये प्रायो नात्यजन्विदुषां वराः ।
शिष्यक्षेत्रेषु सद्विद्याबीजावापैकदीक्षिताः ॥ १५.१३६॥

ग्रामण्यो ब्राह्मणाग्रण्यः प्रापुः पूर्णेक्षशिष्यताम् ।
येषां सद्गुप्तिमात्रेण भवेत्किल परं पदम् ॥ १५.१३७॥

शुश्रूषापक्षपातार्द्रैः केभ्यश्चित्केवलं ददौ ।
रामप्रियो राम इव स्वां गतिं योगिदुर्लभाम् ॥ १५.१३८॥

शिष्यप्रशिष्यातिशया ईदृशा यद्दयोदयात् ।
को नेच्छेत्सुलभं भक्त्या तत्पादसुरपादपम् ॥ १५.१३९॥

इत्थं सद्भिः सद्भिरर्च्यो धरायां
चक्रे वासं शेषशय्ये शयाने ।
ग्रामे वातैः पाविते काण्वतीर्थैः
भक्तप्रीत्या सन्मठेऽनूनबोधः ॥ १५.१४०॥

आनन्दतीर्थभगवद्वदनेन्दुबिम्बं
विद्यासुधाविततकान्ति सुकान्तिकान्तम् ।
यैः प्रैक्ष्यतात्र भवतापशमायभक्तैः
तद्दासदास्यमपि किं न ददाति पुंसः ॥ १५.१४१॥

इति श्रीमत्कविकुलतिलक त्रिविक्रमपण्डिताचार्यसुत

नारायणपण्डिताचार्यविरचिते श्रीमत्सुमध्वविजये

महाकाव्ये आनन्दाङ्के पञ्चदशः सर्गः

षोडशः सर्गः

साधुभ्यो मधुमथनाङ्घ्रिभुक्तिभाग्भ्यः
श्रौतेभ्यो विततमतेर्महानुभावम् ।
वेदान्तं स्वयमिव बन्धमोक्षमूलं
व्याचष्ट स्फुटमथ कोऽपि कोविदोऽत्र ॥ १६.१॥

गोमत्यास्तटनिकटेऽच्छकीर्तिचन्द्रं
विश्वज्ञं क्षितिपतिरन्त्यवर्णजन्मा ।
विद्वेष्टा श्रुतिगुणसाधकं श्रुतीनां
वाचालो वचनमुवाच वाग्मिवर्यम् ॥ १६.२॥

उन्मत्तप्रलपितवन्न तद्धि मानं
यद्वाक्यं व्यभिचरति क्वचित्फलेऽत्र ।
दृष्टान्तो भवति तदप्रमाणतायां
सर्वेषां श्रुतिवचसां च सर्वथेति ॥ १६.३॥

वेदोक्तं फलमलमाप्यतेऽधिकारा-
दित्युक्तोऽतनुमनसाऽभ्यधत्त धूर्तः ।
योग्यत्वे सति न हि दृश्यतेऽधिकारी
नातः स्यात्स खरविषाणवत्सदेति ॥ १६.४॥

आक्षेपं तमसहमान उच्चमानः
सद्योऽसौ निजकरपल्लवद्वयेन ।
आदाय व्यतनुत बीजमोषधीनां
सूक्तेनाङ्कुरदलपुष्पबीजसृष्टिम् ॥ १६.५॥

व्याख्याता निशि स कदाचन प्रदीपे
संशान्ते पुनरपि वाचयाम्बभूव ।
शिष्यान्स्वान्पुरुकरुणाम्बुधिर्निजाङ्घ्रे-
रङ्गुष्ठस्फुटनखरान्तरोचिषैव ॥ १६.६॥

तीर्थार्थं पृथुतरवप्रपातिवारां
धाराणां रयसहनक्षमां महेक्षः ।

आनीतां दशशतपुम्भिरत्यशक्त्या
प्रेक्ष्योचे विपुलशिलां क्वचित्स मुक्ताम् ॥ १६.७॥

लोकानामुपकृतये कुतः शिलेयं
निन्ये नो इति जनता जगाद तत्र ।
नेतारो यतिवरं मानवा नहीमां
भीमश्चेदिह यतते नयेन्नवेति ॥ १६.८॥

निन्ये तां गिरिमिव वानरीकृतात्मा
लीलावत्करकमलेन सोऽमलेन ।
तत्रापि न्यधित तयाऽस्य सूच्यतेऽलं
तत्तुङ्गां ननु निकषाऽधुनाऽपि कर्म ॥ १६.९॥

सङ्घातैरधिकथनैरलङ्कृताध्वा
शिष्याणां यतमनसामुतेतरेषाम् ।
यत्रामावसति तिथाविनेन चन्द्र-
स्तत्रासौ सकलमतिः ससार सिन्धुम् ॥ १६.१०॥

आर्द्राङ्गाः सपदि निमज्जनात्सरस्यां
कण्वस्य द्विजऋषभस्य वल्लभायाम् ।
तत्रायन्खरकिरणोपरागहेतोर्ग्रामीणा
अपि सकलाः सबालवृद्धाः ॥ १६.११॥

सर्वज्ञं सपरिजनं समीक्षमाणाः
फुल्लाक्षाः स्मितवदनाः शुभाः ननन्दुः ।
दौर्मुख्यं दधत उतापरे निनिन्दु-
र्नाश्चर्यं द्वयमपि तत्स्वभावतन्त्रम् ॥ १६.१२॥

मामैनं भुवनगुरुं विनिन्दतेत्थं
निर्भर्त्स्यार्भ्यपतदिवोत्तरङ्गहस्तः ।
सङ्क्षोभी घनघनघोषघोरवेषः
संरम्भी खलदमनाय सिन्धुराजः ॥ १६.१३॥

संमोदात्तरलतरो द्रुताभिगामी
गम्भीरस्वननुतिमान् सुफेनहासः ।
वीच्यङ्गैरधिकतरैरिहाधिवेलं
मध्वाय प्रणतिमिव व्यधात्समुद्रः ॥ १६.१४॥

गोलीलास्वतिशयिनावगाधभावा-
न्नोल्लङ्घ्यौ विविधगुणप्रकाशरत्नौ ।
मध्वाब्धी परममतेः प्रियं जनानां
लावण्यं न तु जलधेरयं विशेषः ॥ १६.१५ ॥

अम्भोधेस्त्वरिततरोर्मिपाणिमृष्टे
स्वच्छेऽसौ विकटतटासने निषण्णः ।
व्याचख्यावतिचिरमैतरेयशाखा-
सूक्तानि प्रभुरतिसुन्दरप्रकारम् ॥ १६.१६ ॥

गाम्भीर्यात्स्वनमधरीकरोति सिन्धोः
श्राव्यत्वं वहति तथाप्यहो स्वनोऽस्य ।
पूर्णेन्दुप्रभवदनः क एष धन्यो
मत्वेत्थं जनजलधिस्तमाशु पर्यैत् ॥ १६.१७ ॥

वेदानां समुचितभाववाददक्षं
ये वेदद्विषमिममूचिरे महेर्ष्याः ।
धिग् धिक्तानिति जनता जगाद गाढं[62]
स्वाश्चर्यात्किल कलिताञ्जलिर्नमन्ती ॥ १६.१८ ॥

सन्मानं विपुलहृदे विधाय भक्त्या
बिभ्राणाश्चरणरजोऽस्य देवसेव्यम् ।
तत्स्नानादधिकशुचौ नदाधिराजे
सस्नुस्ते द्विजनिकराः प्रशस्तकाले ॥ १६.१९ ॥

कल्लोलैः करिनिकरैरिवानिवार्यैः
उल्लोलैर्जननिकरान्निपातयद्भिः ।
आक्रान्ताः प्रबलतरैश्च लोठ्यमाना
हास्यत्वम्प्रययुरुदन्वतीह नैके ॥ १६.२० ॥

मज्जन्तं पृथुलहरीनिगूढमूर्तिं
सम्पूर्णप्रमतिमसज्जनो जहास ।
यो लोकत्रयविजयी गुरुः प्रसिद्धः
सोऽयं हा पतति लघूर्मिलीलयेति ॥ १६.२१ ॥

---

[62] तत्र

नीचानामवचवचांस्यजीगणन्नो
दभ्राणां क्षुभितकराण्यदभ्रसङ्ख्यः ।
क्रोष्टूनां श्वकलकलप्रदं विरावं
पञ्चास्यो न हि गणयेदुदारवीर्यः ॥ १६.२२॥

जन्मस्थित्यवसितिदायिनं कटाक्षं
लोकानामघटयदम्बुधौ बृहद्धीः ।
आक्रान्तोऽधिकगुरुणा स तेन तावन्
मुञ्चन्सञ्चलनमभूत्तटाकदेश्यः ॥ १६.२३॥

इत्यादैरपि चरितैरनन्यसाध्यैः
न स्थेष्ठां बहुमतिमाप दुर्जनोऽस्मिन् ।
विद्वेषं व्यधित पुनर्निरस्तभाग्ये
तस्मिन्दुर्मनसि तदेव शोभनं स्यात् ॥ १६.२४॥

सम्प्राप्तं सह सहजेन गण्डवाटं
स्वोजस्सम्प्रकटन आदिशद्विशङ्कम् ।
शुश्रूषामयमुचितो विधातुमीष-
ल्लोकानामिति वचसा परीक्षकाणाम् ॥ १६.२५॥

श्रीकन्तेश्वरसदनेऽनयत्किलैको
यस्त्रिंशन्नरवरनीतकेतुयष्टिम् ।
आहत्यागुरुगदयैव नारिकेलाद्यो
लेभे तरलतरात्फलानि कामम् ॥ १६.२६॥

एतादृग्बलविभवः स तस्य कण्ठं
तज्ज्येष्ठोऽप्यभित उभौ समं गृहीत्वा ।
निष्पेष्टुं परममवापतुः प्रयत्नं
सङ्घर्षात्क्रमपरिवर्धमानतैक्ष्ण्यम् ॥ १६.२७॥

आस्विन्नावलसतरौ गुरोर्नियोगा-
च्छत्राग्न्यानिलमहितौ च तावुभाभ्याम् ।
मुक्त्वाऽयः कठिनतरत्वचं शिरोधिं
पर्यायस्फुटवचनां निपेततुः कौ ॥ १६.२८॥

आश्वस्तौ शुचिहृदिमावनूनमाना-
वुद्धर्तुं समगददङ्गुलीं धरास्थाम् ।

सङ्गृह्य प्रसभरसादतिप्रयत्नौ[63]
सामर्थ्यं ययतुरिमौ न कम्पनेऽस्याः ॥ १६.२९॥

निर्यत्नं वटुमधिरुह्य मन्दहासी
स प्रायादिह परितो नृसिंहगेहम् ।
ऐश्वर्यैरिति लघिमादिकैरुपेतो
मध्वोऽभूत्त्रिभुवनचित्ररत्नराजः ॥ १६.३०॥

पञ्चाशन्नरपनरोपनीतमात्रां
यो वार्क्षीं गृहमधिरोहिणीं निनाय ।
स व्याख्यास्वरदमनाय पूर्ववाटो
निर्देशाद्व्यधित गुरोर्गलप्रपेषम् ॥ १६.३१॥

स्विन्नेऽस्मिन्नपि यतमान आग्रहोग्रे
प्राच्यात्तत्प्रवचननिस्वनोऽतिरेजे ।
उद्धर्तुं विपुलहृदङ्गुलिं च नालं
सोऽभूदित्यजनि कुतूहलं जनानाम् ॥ १६.३२॥

पर्यैक्षि प्रभुरितरैः शिवाग्निपूर्वैः
नोपैक्षि प्रबलतरैस्तथा प्रयत्नैः ।
नावैक्षि क्वचिदपि शक्त्यपूर्तिरस्मि-
न्नुत्प्रैक्षि स्वयमपि भीम इत्यवश्यम् ॥ १६.३३॥

लेखिन्या मुहुरपिनह्य कृष्यमाणं
नाप्येकं तनुरुहमस्य तूदपाटि ।
नासाग्रे मृदुनि कृतैश्च मुष्टिघातैः
नास्येन्दोरतिबलिभिः प्रसन्नताऽऽसि ॥ १६.३४॥

पञ्चास्यः श्वभिरिव वै[64] विहीनसारै-
रम्भोधिर्नदसरितां जलैरिवाल्पैः ।
खद्योतैरिव तरणिर्विडम्बयन् नृन्
प्रत्यर्थिस्वसमनरैर्व्यवाहरत्सः ॥ १६.३५॥

पारन्तीसुरसदनं विशालसंवित्
सम्प्राप्तः खलु सुचिरान्निवेद्यहीनम् ।

[63] प्रसभरसादपि प्रयत्तौ
[64] हि

ग्राम्याग्र्यक्षितिपतिभिर्दिनार्धमात्रात्
तङ्कूतीर्व्यधित सभूतबल्यनल्पाः ॥ १६.३६॥

भीमत्वे सह सहजैः प्रतिष्ठितः प्राक्
पश्चात्मा मुररिपुरञ्चितो यदत्र ।
पाञ्चाल्या बलिसलिलं समं ददत्या
सोऽस्मार्षीत्तमिममथ प्रपूज्यपूज्यः ॥ १६.३७॥

आयास्यन्किल सरिदन्तराख्यदेशं
ग्रीष्मे निर्जलमिह शुश्रुवांस्तटाकम् ।
तत्काले परमभिवर्षयन् घनौघं
तत्पूर्त्यै व्यधित कुतूहलं नराणाम् ॥ १६.३८॥

दुर्मन्त्रैः खलपटलैः प्रचोद्यमानो
ग्रामेशो वृषलपतिः प्रहर्तुमेनम् ।
सम्प्राप्तस्तत उत यान्तमीक्षमाणः
प्रोद्यन्तं रविमिव विस्मितो ननाम ॥ १६.३९॥

क्षेत्राग्र्यं त्रिभुवनवैद्यनाथनाथं
प्रस्थाय प्रचुरतरान्तरः प्रभावी ।
श्रीकृष्णामृतपरमार्णवाभिधानां
चक्रे सद्वचनततिं स्वभक्तभूत्यै ॥ १६.४०॥

सग्रामं परमपि यात[65] उच्चभूतिं
विद्वांसः क्व कुहरकूपदर्दुराभाः ।
इत्यूचे मदमतिमाननोऽखिलज्ञं
मन्यस्य क्षपयितुमेव तज्जनस्य ॥ १६.४१॥

सर्वज्ञोऽप्ययमधिकं न यज्ञभङ्गीं
संवित्ते यतिरिति बद्धनिश्चयोऽसौ ।
आभान्तं परिषदि मत्सरादपृच्छ-
त्कर्मार्थश्रुतिगहनार्थखण्डभावम् ॥ १६.४२॥

छन्दोभ्यश्च्युतरससङ्ग्रहप्रवीणान्
षष्ठेऽह्नि प्रतिविहितान्प्रजाधिपेन ।
नाराशंस्यचरमचारुमन्त्रभेदा-

[65] परमभियात

नूचेऽसौ तमभिदधद्विसंशयांशः ॥ १६.४३॥

पाण्डित्यं परममवेक्ष्य तस्य तादृक्
सङ्घर्षक्षुभितमना[66] विपक्षसङ्घः ।
नार्थः स्यादयमिति वर्णयन्नथ त्वं
तं ब्रूहीत्युरुमतिनेरितोऽद्रवद् द्राक् ॥ १६.४४॥

सोऽपृच्छत्तमथ महाह्वयोपसर्गा
यत्रोक्ता मनुचरणोपसृज्यरूपाः ।
तस्यार्थं वचनचयस्य तं ब्रुवाणः
स्थैर्यार्थं सपदि स लेखयाम्बभूव ॥ १६.४५॥

सम्पूर्णं शशिनमिवोदितं कृशः श्वा
चुक्षोभाशुभनिकरो निरीक्ष्य मध्वम् ।
प्रत्यर्थी स्वयमिति दूरतोऽभिधावन्[67]
किं तेन क्षतममृताकरस्य तस्य ॥ १६.४६॥

निःस्वानां कतिपयभुक्तियुक्तभक्तं
भक्तानां व्यधित चतुर्गुणं दयालुः ।
भुङ्क्ते स्म त्रिदशनरोपभोज्यमन्नं
सम्प्रीत्यै स धनवतां बृहत्प्रबोधः ॥ १६.४७॥

वृष्ट्यादेः स नियमनादि चक्र एत-
च्चित्रं किं भुवननियामके समीरे ।
अप्येवं भुवनगुरोः कृतानुवादः
कृत्येषु प्रवर इतीह वर्णयामः ॥ १६.४८॥

इत्यूचे धरणिसुरेण केवलं नो
माध्वीयं विविधकथा कथासु मान्या ।
साक्षादप्यमरवरैरुदीर्यमाणा
गन्धर्वैर्द्युसदसि तन्मुदे जगेऽसौ ॥ १६.४९॥

तां पद्यप्रणिगदितां तु मूर्च्छयित्वा
तानानामुचिततयाऽऽत्तपञ्चमाद्याः ।
गान्धारं द्युविषयमुज्ज्वलं सृजन्तो

[66] सङ्घर्षात्क्षुभितमना
[67] दूरवोऽभिधावन्

ग्रामं ते प्रजगुरकाकिकम्रकण्ठाः ॥ १६.५०॥

आनम्रैः सुमुकुटमौलिभिः कराग्रैः
आताम्रैः प्रतिकलितैः स्मितैर्मुखाब्जैः ।
आश्रावि स्थिरतरभक्तिभिः सुरेन्द्रैः
तद्गीता दशधिषणार्यवर्यचर्या ॥ १६.५१॥

गीर्वाणैर्विजयमहोत्सवस्य पूजां
कुर्वाणैरविरलसंविदस्तदानीम् ।
विस्मेरैर्मुनिनिकरोपदेवयुक्तैः
सुस्मेरैरथ तमवेक्षितुं प्रजग्मे ॥ १६.५२॥

आदर्शं गुणगणदर्शने मुरारेः
सच्छास्त्रं रचितमनेन वर्णयन्तः ।
प्रद्योतेरुडुपदवीं प्रकाशयन्तः
प्रैक्षन्त प्रचुरमनोविलासमेते ॥ १६.५३॥

नाकीन्द्रास्तमवनिभागमावसन्तं
सुश्लोकैरपि भुवनानि भूषयन्तम् ।
नेमुः खादुपनिषदं तदैतरेयीं
व्याख्यान्तं विविधविशिष्टशिष्यमध्ये ॥ १६.५४॥

श्रीमन्तं शशिवदनं कुशेशयाक्षं
गम्भीरस्वरमतिदिव्यलक्षणाढ्यम् ।
पश्यन्तः स्वगुरुमथार्चयन् कृतार्था
वाण्या तं हरिरतिपूर्णकाममेते ॥ १६.५५॥

अहरो दुरागमतमः स्वगोगणै-
रकरोर्मुकुन्दगुणवृन्ददर्शनम् ।
अजयश्चतुर्दशजगन्ति सद्गुणैः
शरणं गुरो करुणयाऽपि नो भवेः ॥ १६.५६॥

नमस्ते प्राणेश प्रणतविभवायावनिमगाः
नमः स्वामिन् रामप्रियतम हनूमन् गुरुगुण ।
नमस्तुभ्यं भीम प्रबलतम कृष्णेष्ट भगवन्
नमः श्रीमन्मध्व प्रदिश सुदृशं नो जय जय ॥ १६.५७॥

इति निगदितवन्तस्तत्रवृन्दारकेन्द्रा
गुरुविजयमहं तं लालयन्तो महान्तम् ।
ववृषुरखिलदृश्यं पुष्पवारं सुगन्धं
हरिदयितवरिष्ठे श्रीमदानन्दतीर्थे ॥ १६.५८ ॥

इति श्रीमत्कविकुलतिलक त्रिविक्रमपण्डिताचार्यसुत

नारायणपण्डिताचार्यविरचिते श्रीमत्सुमध्वविजये

महाकाव्ये आनन्दाङ्के षोडशः सर्गः

समाप्तोऽयं ग्रन्थः

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु

॥ अणुमध्वविजयः ॥

श्रीशप्रीत्यै प्रजातः सुमहितमहिमा श्रीहनूमान् निदेशात्
रामस्योल्लङ्घिताब्धिः सहरिरथ गतः सेतुना पिष्टदुष्टः ।
भूभृन्नी रावणारिं पुरगमुरुदयं पूजयित्वा ससीतं
पश्यन् किम्पूरुषे तं सततमपि महाप्राणमुख्योऽवतान्माम्[68] ॥ १॥

भीमोऽभूद् यो न भेद्यश्चकितरिपुकृतापत्प्रतारी[69] सलीलं
रक्षोघ्नः प्राप्तकृष्णो मखकृदुत वने दुष्टहा कीचकघ्नः ।
हत्वा दुर्योधनादीन् स्वपदमुपगतो[70] यद्द्विषः क्रोधतन्त्रा
भूत्वा भूमौ कुशास्त्रं व्यधिषत मणिमत्पूर्वकाः पातु सोऽस्मान् ॥ २॥

अज्ञानोत्सादनार्थं सुरवरवचसा सूचितो रूप्यभर्त्रा
जातो मध्यालयार्याद् गुरुमतितपसो वासुदेवाभिधानः ।
गोदात्रे मोक्षदाता रजतपतिपदासेवको भूतभर्त्रा
मान्यः प्राणः कुलित्थैरपि निजसहजातर्पितः प्रीयतां मे ॥ ३॥

आनन्दं मन्दहासामृतरसकलया सन्दधानः प्रजाना-
मास्येन्दोः शोभमानैरपि कलवचनैर्बाललीलाविलासैः ।
गोपुच्छालम्बनाद्यैर्वृषपतिविहितापत्प्रणोदी प्रणुद्या-
दज्ञानाद्यापदं मे स्वयमिव भगवान् वासुदेवोऽसुदेवः ॥ ४॥

एकाकी योजनाभ्यां व्यवहितमगमद्यस्त्रिवर्षोऽमरौको
यो लाल्यो लोकमात्रा स्वलिपिपरिचये तातविस्मेरताकृत् ।
प्राज्ञम्मन्यं शिवाख्यं परिषदि जितवान् शाखिनामर्थमूचे
दुर्गं पित्रोपनीतः सुरवरमहितो मह्यतां मे वचोभिः ॥ ५॥

पायान्मां यो भुजङ्गं सदरिमदयमद् द्रागुपाध्यायसेवी
विश्वेभ्यो(ऽ)वेगदूरस्रवनविधि[71]नियुद्धादिवीर्यातिशायी ।
येनास्ता मूढशङ्का श्रुतिशुचिवचसाऽलं गुरोः शिर्षशूला

[68] महान् प्राणमुख्योऽवतान्मम्
[69] प्रणोदी
[70] स्वपदमधिगतो
[71] स्रवनजव

सख्युर्नारायणज्ञोऽथ य उपनिषदं व्याख्यतास्मै सुरार्च्यः ॥ ६ ॥

सन्यासे बद्धबुद्धिः कृतहरिनमनः पार्थपूज्यं यतिं प्राक्
प्राज्ञं गुर्वाज्ञयाऽलं सुगुणहरिविदं सत्तपस्तृप्तदेवम्[72] ।
प्राप्तं सर्वज्ञशिष्याख्यवरमुपगतो द्विः स्वतातं निषेद्धुं
प्राप्तं चानुत्तरं यो व्यधित सहजवान् मातरं चावतान्माम् ॥ ७ ॥

पूर्णप्रज्ञाख्य आसीद्यतिकुलतिलको यः शुभाचार ईश-
प्रत्तोऽस्मा ईश्वराज्ञागतसुरसरिति स्नानकृज्जैत्रपत्रः ।
दुष्पद्यच्छिच्च लोके प्रवचनचतुरः सत्पुराणेतिहास-
स्योक्तौ मेधाप्रदर्शी दिशतु शुभदृशं मह्यमृज्वग्रणीः सः ॥ ८ ॥

साक्षादानन्दतीर्थोऽनुमितिभिररुरुजिद् योऽनुमातीर्थनामा
बुद्ध्यब्धिं[73] वादिसिंहं सपदि विजितवान् दुष्टभाष्यापनोदी ।
अच्छेद्योक्तिः प्रमोदं पितुरपि कृतवान् नर्मगर्भं गुरूक्तो
भाष्यं कर्तुं ह्यवोचत् प्रियसखयतये सूत्रभावं स माऽव्यात् ॥ ९ ॥

याम्याशां यान् प्रभोक्ता बहुफलसमितेः क्षीरिणीं प्रेक्ष्य यान्तीं
स्यानन्दूरं[74] च दैत्यं सपदि विजितवान् फाल्गुनं तीर्थमाप्तः ।
सेतुं चात्रापि हास्यं खलमथ कृतवान् सर्वजिद् रङ्गनाथं
नत्वा यान् विश्ववन्द्यो ह्युपनदि विबुधौकस्यवेन्मां स धन्यः ॥ १० ॥

विश्वादीनां शतार्थप्रवचनचतुरो दानसूक्तार्थवादी
दिव्यज्ञानप्रकाशी सकलजिदखिलज्ञाभिधः प्राप्तरूप्यः ।
भीमो वा भीमसन्धः खलकुलदमने गीतिकाभाष्यकारी
गुर्वर्थी[75] यानुदीचीं मम मनसि लसेत् तीर्थशोधी स मध्वः ॥ ११ ॥

गङ्गातारी सुकर्मोपगतबदरिकान्तोऽत्र नारायणं यो
नत्वैकान्ते समुद्यः प्रवचनकृदथो सत्तपाः कृष्णनुन्नः ।
आप्तेभ्यः कार्यलेखी स्वमनुगतनिजप्रेरकः पाणिमात्रात्
मारुत्याभः प्रपश्यन् हरिमपि गिरिणा[76] सार्धमृद्ध्यै स मे स्यात् ॥ १२ ॥

योऽपश्यत् स्वाश्रमाग्र्यं मुनिमहितगुणो दिव्यसालं च चित्रं

---

[72] सत्तपस्तृप्तदेवात्
[73] विद्याब्धिं
[74] स्यानन्दूरे
[75] गुर्वर्ची
[76] गुरुणा

तत्रर्षीणां समाजे हरिमपि मुनितः सत्यवत्यां प्रजातम् ।
कर्तारं भारतादेर्भरतवरगुरुं ब्रह्मसूत्रस्य चाहो
निर्दोषं नित्यपूर्णागणितगुणमसौ प्रीयतां मे स चेशः ॥ १३॥

सर्वाङ्गैः सर्ववन्द्यैर्विमलकुवलयश्यामलैः शोभमानं
सज्ज्ञानानन्द[77]तेजःप्रवरगुणमयैः पूर्णलावण्यरूपैः ।
बिम्बोष्ठं पद्मपादं शुभकपिशजटं सैणचर्माणमीशं
दृष्ट्वा नत्वोपगूढः स गुरुरवतु नः सूपविष्टो मुनीष्टः ॥ १४॥

शिष्यं व्यासस्य नारायणमथ च गतं सर्वहेतुं सुमत्स्यं[78]
साश्वास्यं कूर्मकोलौ नृहरिमथ मनुं वामनं बुद्धरामौ ।
व्यासं काकुत्स्थकृष्णावतिचिरमितरानन्दनं कल्कियज्ञौ
सिद्धेशं नौमि धन्वन्तरिवरवनिताख्यं तमेनं स्मरन्तम् ॥ १५॥

दत्तात्रेयं कुमारं हृदि दधदृषभं हंसकृष्णौ हरिं तं
धार्मं नारायणाख्यं सदशशतसहस्त्राद्यनन्तावतारम् ।
तन्नुन्नस्तत्त्वसूक्तयै वरमुचितनरैरेव[79] सेव्यत्वमाप्तः
कृच्छ्राद्यात्रोन्मुखो मे स गतिरपि हरिर्व्यासनारायणाख्यः ॥ १६॥

लब्ध्वाऽनुज्ञां मुकुन्दात् स्वजनमुपगतोऽनेकभिक्षाप्रभोक्ताऽ-
तुल्यं भाष्यं च कुर्वन् स्वसमगुणगनं[80] सम्प्रयातः पुनर्यान् ।
षट्शास्त्राशेषशाखास्वखिलविजयवान् शोभनं सूरिवर्यं
शिष्यं लब्ध्वाऽतिजैत्रं पुनरपि विविधान् प्राप्तरूप्यो गतिर्मे ॥ १७॥

सख्ये व्याख्याय भाष्यं कलिमलमपनीयाच्युतज्ञाय चालं
कार्ष्णीमर्चामचाल्यां त्रिदशकतरुणैर्लीलयाऽऽनीय रूप्ये ।
आस्थाप्योदस्य यज्ञप्रतिहतिनिरतान् कारयित्वा स्वयज्ञं
व्यासं नत्वा पुनश्च प्रतिगतरजतः सम्प्रसीदेत् स मध्वः ॥ १८॥

सागस्त्वादीशदेवं परवशखननं यो व्यधादप्लवः स्वै-
र्गङ्गातारी स्वनीत्या[81] वशितयवनराड् वर्त्मनि क्वापि चोरान् ।
हन्तुं यातान् मिथोऽहन् क्वचिदपि निजशिष्येण चाद्रावयद् द्राक्
योगेनाभूच्छ्लाभः क्वचिदपि सगणस्तं महेक्षं दिदृक्षे ॥ १९॥

---

[77] विज्ञानानन्द
[78] सुमात्स्यम्
[79] वरमुचितनरैरेष
[80] स्वगुणसमगुणम्
[81] स्वरीत्या

दैत्यव्याघ्रोपघाती नरसखकरतो लब्धगौरोपलार्चो
व्यासाज्ञाभृत्[82] सुतर्ता लघु सुरसरितो वारिसंस्तम्भयोगात् ।
भित्वा भूमिं द्युनद्या मठमुपगतया वन्दितो मूर्तिमत्या
यूनोऽनेकान् विजिग्ये युगपदुपगतान् यः सलीलं तमीडे ॥ २०॥

स्वर्गाह्वोक्तिप्रखण्डी सकलसमयिजिद्व्यख्ययाऽभात् पुराऽजौ
शिष्याणामायुधानि प्रकटयति पुरा पूजितः शूलिनाऽभूत् ।
प्रत्यक्षेण क्वचिद्यो दशशतगुरुरम्भापयोभुक् क्षणात् सद्-
गानात् पुष्पादिकारीत्यभिहितचरितो यः शुभैस्तं प्रपद्ये ॥ २१॥

व्याख्यां श्रुत्त्वा मुनिभ्योऽभ्यधित समयतो यस्य लभ्यं फणीन्द्रो
वैकुण्ठं हेमनानामणिमयसदनं श्रीशधामास्तदोषम् ।
सायुज्याद्याप्तसौख्यैरखिलविषयिभिः सुन्दरीभोगभाग्भि-
र्ब्रह्माद्यैनाथदृग्भिर्विलसितमतुलं सोऽनुगृह्णातु नोऽलम् ॥ २२॥

नानादुर्नीतिवादैर्विहितमुरुमदं मायिभूतासुरेन्द्रै-
र्योऽयं वेदान्तिसिंहो व्यजयत कुरवं पुण्डरीकं च काण्डम् ।
विश्वाश्चर्यप्रकारं प्रवचनमकरोच्छन्दसां यत्स्पृधाऽन्य-
स्तत् कुर्वन् हास्य आसीद् द्विजवरनिकरे स्याम तद्दासदासाः ॥ २३॥

पद्माख्यं सिन्धुराजं प्रियजनपरमागस्कृतं प्राप्य भीते-
रन्यान् कुर्वाणमग्रे सपदि निजगृहे गोगणैर्मध्वपार्थः ।
यो यद्दसोक्तिबाणैर्विदलितहृदया दुद्रुवुर्मायिदैत्या
सर्वज्ञाह्वो[83] हरिर्यो जगति विजयते स प्रदद्याज्जयं नः ॥ २४॥

श्रीकान्ताङ्घ्रिप्रसङ्गादधिकशुभतमो[84] यान् यथा गाङ्ग ओघो
राज्ञा संवन्दिताङ्घ्रिः सकलगुणगणोपेतपादादिकान्तः ।
सर्वेषां दर्शनीयो लिकुचकुलभवो वेदशास्त्रादिवेदी[85]
प्रापायुग्विक्रमार्यो यमखिलगुरुमानन्दतीर्थाख्यमीडे[86] ॥ २५॥

लब्धग्रन्थः स्तुतोऽलं लिकुचकविवरेणेह निन्ये दिनानि
श्रीभर्तुः प्रीतिवृद्ध्यै विविधशुभकृतीः केवलं यस्तु कुर्वन् ।

[82] व्यासाज्ञाह्वत्
[83] विश्वज्ञाह्वो
[84] दधिकशुचितमो
[85] वेदशास्त्रानुसारी
[86] मानन्दतीर्थं प्रवन्दे

निर्लेपो दग्धकर्मा मतिकृतिकरणैर्लोकशिक्षां च कर्तुं
देवैर्वृष्टामृउतार्चः प्रवचनचतुरो[87] मे प्रवक्तृत्वदः स्यात् ॥ २६॥

स्नातो देवाभिषेक्ता सदरिदरधरस्तन्त्रशास्त्रानुसृत्या[88]
सम्यक् सम्पूज्य विष्णुं वरतुलसिकया दर्शनीयोऽथ भुक्त्वा ।
नानालोकाभिनन्दी गुरुरथ विलसद्व्याख्यया सान्ध्यकृत्यं
कृत्वा गोविन्दलीलाकथक उत कथां वैष्णवीं वाचयेन्नः ॥ २७॥

मान्योपन्यासधन्यो हरिरमितगुणो[89] ब्रह्म वेदैकवेद्यः
कर्ता विश्वस्य मोक्षं शुभसुखविषयं राति भक्तेभ्य इत्थम् ।
सत्तर्कैः साधयित्वा श्रुतिशतसहितैः सूरिसूनुं विजित्य
व्याख्याता तस्य पूर्णप्रमतिरनुदिनं व्याख्ययाऽऽप्याययेन्माम् ॥ २८॥

साम्नस्त्रैविक्रमार्याद्वयरचयदनुभाष्यं शतग्रन्थकर्ता
सोदर्यं स्वं विरक्तं यतिमकृत महासद्गुणं विष्णुतीर्थम् ।
वादीन्द्रं पद्मनाभं प्रियमथ च परान् सद्गुणान् श्लाघ्यशिष्यान्
योऽनेकान् सद्गृहस्थानपि स विजयते कण्वतीर्थान्तिकस्थः ॥ २९॥

संस्तव्यो वेदमानं समवितुमतनोदोषधीर्यः क्षणान्ते
दीप्ताङ्गुष्ठः शिलानीः श्रुतिविवरणकृद् वर्णितः स्तम्भिताब्धिः ।
अङ्गुल्या गण्डवाटावतुलबलचणौ चालने यस्य नालं
प्राग्वाटो वा वटूढो मम मनसि लसेदप्यलाव्यैकलोमा ॥ ३०॥

पारन्तीशाभिनन्दी सपदि स सरितामन्तरेऽवर्षयद् यो
ग्रीष्मे मित्रीचकाराप्यहितमथ गतो वैद्यनाथं स्वभूत्यै ।
छन्दःखण्डार्थवादी जितकुमतिकुलो दुर्जनेर्ष्याभ्युपेक्षी
लघ्वन्नं बृंहयेदत्त्यपि बहु धनिनामल्पकल्पेन तुष्येत् ॥ ३१॥

वृष्ट्यादीनां नियन्तेत्यभिहितचरितः सर्वगीर्वाणरत्नै-
र्गन्धर्वैर्गीयमानो द्युसदसि सकलैः कौतुकाद्गम्यमानः[90] ।
दृष्ट्वा संस्तूयमानः सुरतरुकुसुमैरार्य आकीर्यमाणो
मध्वो जाज्वल्यतेऽसौ[91] जगति विजयते सत्सभामङ्गळाय ॥ ३२॥

---

[87] प्रवचननिरतो
[88] शास्त्रानुवृत्या
[89] हरिरखिलगुणो
[90] कौतुकान्नम्यमानः
[91] देदीप्यतेऽसौ

दशप्रमतिविक्रमं बहुविधात्मना हेमवत्
सुमध्वविजयाभिधं[92] व्यधित भावदीपाह्वयम् ।
प्रमेयनवमालिकां पुनरिमां च दक्षान्वितां[93]
सतां श्रवणभूषणं व्यदधदेष[94] नारायणः ॥ ३३ ॥

इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुत

नारायणपण्डिताचर्य विरचितः अणुमध्वविजयः

॥ भारतीरमणमुख्यप्राणान्तर्गत श्री कृष्णार्पणमस्तु॥

[92] स मध्वविजयाभिधं
[93] दक्षां च ताम्
[94] व्यतनुतैष

॥ सुमध्वविजयप्रमेयफलमालिका ॥

श्रीमध्वविजये सर्गाः षोडशानुक्रमादहम् ।
तेषां प्रमेयं वक्ष्यामि सङ्ग्रहेण फलं तथा ॥ १॥

बळित्थ्येत्यादिसूक्तोक्तं वायो रूपत्रयं परम् ।
प्रथमे प्रथमं प्रोक्तं द्वितीयं तु[95] ततः परम् ॥ २॥

सच्छास्त्रे दूषिते दुष्टैः सुरप्रार्थनया हरेः ।
आज्ञया चावतीर्णस्य द्वितीये बाल्यसत्कथाः ॥ ३॥

सूपनीतः[96] सुविधिना स्वपित्राऽधीतवान् द्विजात् ।
बहून् वेदान् क्षणेनैव तृतीये कथितं त्विदम् ॥ ४॥

तुर्याश्रममनुप्राप्य वेदान्तनिरतोऽभवत् ।
शिष्यानध्यापयामास सम्प्रदायमहापयन् ॥ ५॥

व्याख्यान् भाष्यं मायिकृतं ज्ञापयन् तस्य दुष्टताम् ।
सूचयन्नुत्तरं भाष्यं जिगाय प्रतिवादिनः ॥ ६॥

तत्र तत्र विचित्राणि चरित्राणि प्रदर्शयन् ।
चरन् क्षेत्रेषु सर्वेषु हिमवन्तं ददर्श सः ॥ ७॥

मनसा मानयन् मुख्यगुरुं व्यासं ह्रदम्बरे ।
अपश्यच्चक्षुषाऽप्यत्र स्थितं मुनिगणैर्वृतम्[97] ॥ ८॥

---

[95] च
[96] सुपनीतः
[97] मुनिगणैर्युतम्

नारायणं नमस्कृत्य तत्रस्थं गुरुणा सह ।
गतस्ताभ्यामनुज्ञातः भाष्यं कर्तुं सतां मुदे ॥ ९ ॥

